॥ শ্রীমদ্ভগবদ্গীতা ॥
॥ ওঁ শ্রী পরমাত্মনে নমঃ ॥
॥ অথ শ্রীমদ্ভগবদ্গীতা ॥
অথ প্রথমোঽধ্যায়ঃ । অর্জুনবিষাদয়োগঃ

ধৃতরাষ্ট্র উবাচ ।

ধর্মক্ষেত্রে কুরুক্ষেত্রে সমবেতা য়ুয়ুত্সবঃ ।
মামকাঃ পাণ্ডবাশ্চৈব কিমকুর্বত সঞ্জয় ॥ ১-১॥

সঞ্জয় উবাচ ।

দৃষ্ট্বা তু পাণ্ডবানীকং ব্যূঢং দুর্যোধনস্তদা ।
আচার্যমুপসঙ্গম্য রাজা বচনমব্রবীত্ ॥ ১-২॥

পশ্যৈতাং পাণ্ডুপুত্রাণামাচার্য মহতীং চমূম্ ।
ব্যূঢাং দ্রুপদপুত্রেণ তব শিষ্যেণ ধীমতা ॥ ১-৩॥

অত্র শূরা মহেষ্বাসা ভীমার্জুনসমা য়ুধি ।
য়ুয়ুধানো বিরাটশ্চ দ্রুপদশ্চ মহারথঃ ॥ ১-৪॥

ধৃষ্টকেতুশ্চেকিতানঃ কাশিরাজশ্চ বীর্যবান্ ।
পুরুজিত্কুন্তিভোজশ্চ শৈব্যশ্চ নরপুঙ্গবঃ ॥ ১-৫॥

য়ুধামন্যুশ্চ বিক্রান্ত উত্তমৌজাশ্চ বীর্যবান্ ।
সৌভদ্রো দ্রৌপদেয়াশ্চ সর্ব এব মহারথাঃ ॥ ১-৬॥

অস্মাকং তু বিশিষ্টা য়ে তান্নিবোধ দ্বিজোত্তম ।
নায়কা মম সৈন্যস্য সংজ্ঞার্থং তান্ব্রবীমি তে ॥ ১-৭॥

ভবান্ভীষ্মশ্চ কর্ণশ্চ কৃপশ্চ সমিতিঞ্জয়ঃ ।
অশ্বত্থামা বিকর্ণশ্চ সৌমদত্তিস্তথৈব চ ॥ ১-৮॥

অন্যে চ বহবঃ শূরা মদর্থে ত্যক্তজীবিতাঃ ।
নানাশস্ত্রপ্রহরণাঃ সর্বে য়ুদ্ধবিশারদাঃ ॥ ১-৯॥

অপর্যাপ্তং তদস্মাকং বলং ভীষ্মাভিরক্ষিতম্ ।
পর্যাপ্তং ত্বিদমেতেষাং বলং ভীমাভিরক্ষিতম্ ॥ ১-১০॥

অয়নেষু চ সর্বেষু য়থাভাগমবস্থিতাঃ ।
ভীষ্মমেবাভিরক্ষন্তু ভবন্তঃ সর্ব এব হি ॥ ১-১১॥

তস্য সঞ্জনয়ন্হর্ষং কুরুবৃদ্ধঃ পিতামহঃ ।
সিংহনাদং বিনদ্যোচ্চৈঃ শঙ্খং দধ্মৌ প্রতাপবান্ ॥ ১-১২॥

ততঃ শঙ্খাশ্চ ভের্যশ্চ পণবানকগোমুখাঃ ।
সহসৈবাভ্যহন্যন্ত স শব্দস্তুমুলোঽভবত্ ॥ ১-১৩॥

BACK TO TOP

ততঃ শ্বেতৈর্হয়ৈর্যুক্তে মহতি স্যন্দনে স্থিতৌ ।
মাধবঃ পাণ্ডবশ্চৈব দিব্যৌ শঙ্খৌ প্রদধ্মতুঃ ॥ ১-১৪॥

পাঞ্চজন্যং হৃষীকেশো দেবদত্তং ধনঞ্জয়ঃ ।
পৌণ্ড্রং দধ্মৌ মহাশঙ্খং ভীমকর্মা বৃকোদরঃ ॥ ১-১৫॥

অনন্তবিজয়ং রাজা কুন্তীপুত্রো যুধিষ্ঠিরঃ ।
নকুলঃ সহদেবশ্চ সুঘোষমণিপুষ্পকৌ ॥ ১-১৬॥

কাশ্যশ্চ পরমেষ্বাসঃ শিখণ্ডী চ মহারথঃ ।
ধৃষ্টদ্যুম্নো বিরাটশ্চ সাত্যকিশ্চাপরাজিতঃ ॥ ১-১৭॥

দ্রুপদো দ্রৌপদেয়াশ্চ সর্বশঃ পৃথিবীপতে ।
সৌভদ্রশ্চ মহাবাহুঃ শঙ্খান্দধ্মুঃ পৃথক্পৃথক্ ॥ ১-১৮॥

স ঘোষো ধার্তরাষ্ট্রাণাং হৃদয়ানি ব্যদারয়ত্ ।
নভশ্চ পৃথিবীং চৈব তুমুলোঽভ্যনুনাদয়ন্ ॥ ১-১৯॥ orলো ব্যনু

অথ ব্যবস্থিতান্দৃষ্ট্বা ধার্তরাষ্ট্রান্ কপিধ্বজঃ ।
প্রবৃত্তে শস্ত্রসম্পাতে ধনুরুদ্যম্য পাণ্ডবঃ ॥ ১-২০॥

হৃষীকেশং তদা বাক্যমিদমাহ মহীপতে ।

অর্জুন উবাচ ।

সেনয়োরুভয়োর্মধ্যে রথং স্থাপয় মেঽচ্যুত ॥ ১-২১॥

যাবদেতান্নিরীক্ষেঽহং যোদ্ধুকামানবস্থিতান্ ।
কৈর্ময়া সহ যোদ্ধব্যমস্মিন্ রণসমুদ্যমে ॥ ১-২২॥

যোত্স্যমানানবেক্ষেঽহং য এতেঽত্র সমাগতাঃ ।
ধার্তরাষ্ট্রস্য দুর্বুদ্ধের্যুদ্ধে প্রিয়চিকীর্ষবঃ ॥ ১-২৩॥

সঞ্জয় উবাচ ।

এবমুক্তো হৃষীকেশো গুডাকেশেন ভারত ।
সেনয়োরুভয়োর্মধ্যে স্থাপয়িত্বা রথোত্তমম্ ॥ ১-২৪॥

ভীষ্মদ্রোণপ্রমুখতঃ সর্বেষাং চ মহীক্ষিতাম্ ।
উবাচ পার্থ পশ্যৈতান্সমবেতান্কুরূনিতি ॥ ১-২৫॥

তত্রাপশ্যত্স্থিতান্পার্থঃ পিতৄনথ পিতামহান্ ।
আচার্যান্মাতুলান্ভ্রাতৄন্পুত্রান্পৌত্রান্সখীংস্তথা ॥ ১-২৬॥

শ্বশুরান্সুহৃদশ্চৈব সেনয়োরুভয়োরপি ।
তান্সমীক্ষ্য স কৌন্তেয়ঃ সর্বান্বন্ধূনবস্থিতান্ ॥ ১-২৭॥

BACK TO TOP

কৃপয়া পরয়াবিষ্টো বিষীদন্নিদমব্রবীত্ ।

অর্জুন উবাচ ।

দৃষ্ট্বেমং স্বজনং কৃষ্ণ যুযুত্সুং সমুপস্থিতম্ ॥ ১-২৮॥

সীদন্তি মম গাত্রাণি মুখং চ পরিশুষ্যতি ।
বেপথুশ্চ শরীরে মে রোমহর্ষশ্চ জায়তে ॥ ১-২৯॥

গাণ্ডীবং স্রংসতে হস্তাত্ত্বক্চৈব পরিদহ্যতে ।
ন চ শক্নোম্যবস্থাতুং ভ্রমতীব চ মে মনঃ ॥ ১-৩০॥

নিমিত্তানি চ পশ্যামি বিপরীতানি কেশব ।
ন চ শ্রেয়োঽনুপশ্যামি হত্বা স্বজনমাহবে ॥ ১-৩১॥

ন কাঙ্ক্ষে বিজয়ং কৃষ্ণ ন চ রাজ্যং সুখানি চ ।
কিং নো রাজ্যেন গোবিন্দ কিং ভোগৈর্জীবিতেন বা ॥ ১-৩২॥

যেষামর্থে কাঙ্ক্ষিতং নো রাজ্যং ভোগাঃ সুখানি চ ।
ত ইমেঽবস্থিতা যুদ্ধে প্রাণাংস্ত্যক্ত্বা ধনানি চ ॥ ১-৩৩॥

আচার্যাঃ পিতরঃ পুত্রাস্তথৈব চ পিতামহাঃ ।
মাতুলাঃ শ্বশুরাঃ পৌত্রাঃ শ্যালাঃ সম্বন্ধিনস্তথা ॥ ১-৩৪॥

এতান্ন হন্তুমিচ্ছামি ঘ্নতোঽপি মধুসূদন ।
অপি ত্রৈলোক্যরাজ্যস্য হেতোঃ কিং নু মহীকৃতে ॥ ১-৩৫॥

নিহত্য ধার্তরাষ্ট্রান্নঃ কা প্রীতিঃ স্যাজ্জনার্দন ।
পাপমেবাশ্রয়েদস্মান্হত্বৈতানাততায়িনঃ ॥ ১-৩৬॥

তস্মান্নার্হা বয়ং হন্তুং ধার্তরাষ্ট্রান্সবান্ধবান্ ।
স্বজনং হি কথং হত্বা সুখিনঃ স্যাম মাধব ॥ ১-৩৭॥

যদ্যপ্যেতে ন পশ্যন্তি লোভোপহতচেতসঃ ।
কুলক্ষয়কৃতং দোষং মিত্রদ্রোহে চ পাতকম্ ॥ ১-৩৮॥

কথং ন জ্ঞেয়মস্মাভিঃ পাপাদস্মান্নিবর্তিতুম্ ।
কুলক্ষয়কৃতং দোষং প্রপশ্যদ্ভির্জনার্দন ॥ ১-৩৯॥

কুলক্ষয়ে প্রণশ্যন্তি কুলধর্মাঃ সনাতনাঃ ।
ধর্মে নষ্টে কুলং কৃত্স্নমধর্মোঽভিভবত্যুত ॥ ১-৪০॥

অধর্মাভিভবাত্কৃষ্ণ প্রদুষ্যন্তি কুলস্ত্রিয়ঃ ।
স্ত্রীষু দুষ্টাসু বার্ষ্ণেয় জায়তে বর্ণসঙ্করঃ ॥ ১-৪১॥

সঙ্করো নরকায়ৈব কুলঘ্নানাং কুলস্য চ ।

BACK TO TOP

পতন্তি পিতরো হ্যেষাং লুপ্তপিণ্ডোদকক্রিয়াঃ ॥ ১-৪২॥

দোষৈরেতৈঃ কুলঘ্নানাং বর্ণসঙ্করকারকৈঃ ।
উত্সাদ্যন্তে জাতিধর্মাঃ কুলধর্মাশ্চ শাশ্বতাঃ ॥ ১-৪৩॥

উত্সন্নকুলধর্মাণাং মনুষ্যাণাং জনার্দন ।
নরকে নিয়তং বাসো ভবতীত্যনুশুশ্রুম ॥ ১-৪৪॥orনরকেঽনিয়তং

অহো বত মহত্পাপং কর্তুং ব্যবসিতা বয়ম্ ।
যদ্রাজ্যসুখলোভেন হন্তুং স্বজনমুদ্যতাঃ ॥ ১-৪৫॥

যদি মামপ্রতীকারমশস্ত্রং শস্ত্রপাণয়ঃ ।
ধার্তরাষ্ট্রা রণে হন্যুস্তন্মে ক্ষেমতরং ভবেত্ ॥ ১-৪৬॥

সঞ্জয় উবাচ ।

এবমুক্ত্বার্জুনঃ সঙ্খ্যে রথোপস্থ উপাবিশত্ ।
বিসৃজ্য সশরং চাপং শোকসংবিগ্নমানসঃ ॥ ১-৪৭॥

ওঁ তত্সদিতি শ্রীমদ্ভগবদ্গীতাসূপনিষত্সু
ব্রহ্মবিদ্যায়াং যোগশাস্ত্রে শ্রীকৃষ্ণার্জুনসংবাদে
অর্জুনবিষাদয়োগো নাম প্রথমোঽধ্যায়ঃ ॥ ১॥

অথ দ্বিতীয়োঽধ্যায়ঃ । সাঙ্খ্যয়োগঃ

সঞ্জয় উবাচ ।

তং তথা কৃপয়াবিষ্টমশ্রুপূর্ণাকুলেক্ষণম্ ।
বিষীদন্তমিদং বাক্যমুবাচ মধুসূদনঃ ॥ ২-১॥

শ্রীভগবানুবাচ ।

কুতস্ত্বা কশ্মলমিদং বিষমে সমুপস্থিতম্ ।
অনার্যজুষ্টমস্বর্গ্যমকীর্তিকরমর্জুন ॥ ২-২॥

ক্লৈব্যং মা স্ম গমঃ পার্থ নৈতত্ত্বয্যুপপদ্যতে ।
ক্ষুদ্রং হৃদয়দৌর্বল্যং ত্যক্ত্বোত্তিষ্ঠ পরন্তপ ॥ ২-৩॥

অর্জুন উবাচ ।

কথং ভীষ্মমহং সঙ্খ্যে দ্রোণং চ মধুসূদন ।
ইষুভিঃ প্রতিয়োত্স্যামি পূজার্হাবরিসূদন ॥ ২-৪॥

গুরূনহত্বা হি মহানুভাবান্
শ্রেয়ো ভোক্তুং ভৈক্ষ্যমপীহ লোকে ।
হত্বার্থকামাংস্তু গুরূনিহৈব
ভুঞ্জীয় ভোগান্ রুধিরপ্রদিগ্ধান্ ॥ ২-৫॥

BACK TO TOP

ন চৈতদ্বিদ্মঃ কতরন্নো গরীয়ো
যদ্বা জয়েম যদি বা নো জয়েয়ুঃ ।
যানেব হত্বা ন জিজীবিষামস্-
তেঽবস্থিতাঃ প্রমুখে ধার্তরাষ্ট্রাঃ ॥ ২-৬॥

কার্পণ্যদোষোপহতস্বভাবঃ
পৃচ্ছামি ত্বাং ধর্মসম্মূঢচেতাঃ ।
যচ্ছ্রেয়ঃ স্যান্নিশ্চিতং ব্রূহি তন্মে
শিষ্যস্তেঽহং শাধি মাং ত্বাং প্রপন্নম্ ॥ ২-৭॥

ন হি প্রপশ্যামি মমাপনুদ্যাদ্
যচ্ছোকমুচ্ছোষণমিন্দ্রিয়াণাম্ ।
অবাপ্য ভূমাবসপত্নমৃদ্ধং
রাজ্যং সুরাণামপি চাধিপত্যম্ ॥ ২-৮॥

সঞ্জয় উবাচ ।

এবমুক্ত্বা হৃষীকেশং গুডাকেশঃ পরন্তপ ।
ন যোত্স্য ইতি গোবিন্দমুক্ত্বা তূষ্ণীং বভূব হ ॥ ২-৯॥

তমুবাচ হৃষীকেশঃ প্রহসন্নিব ভারত ।
সেনয়োরুভয়োর্মধ্যে বিষীদন্তমিদং বচঃ ॥ ২-১০॥

শ্রীভগবানুবাচ ।

অশোচ্যানন্বশোচস্ত্বং প্রজ্ঞাবাদাংশ্চ ভাষসে ।
গতাসূনগতাসূংশ্চ নানুশোচন্তি পণ্ডিতাঃ ॥ ২-১১॥

ন ত্বেবাহং জাতু নাসং ন ত্বং নেমে জনাধিপাঃ ।
ন চৈব ন ভবিষ্যামঃ সর্বে বয়মতঃ পরম্ ॥ ২-১২॥

দেহিনোঽস্মিন্যথা দেহে কৌমারং যৌবনং জরা ।
তথা দেহান্তরপ্রাপ্তির্ধীরস্তত্র ন মুহ্যতি ॥ ২-১৩॥

মাত্রাস্পর্শাস্তু কৌন্তেয় শীতোষ্ণসুখদুঃখদাঃ ।
আগমাপায়িনোঽনিত্যাস্তাংস্তিতিক্ষস্ব ভারত ॥ ২-১৪॥

যং হি ন ব্যথয়ন্ত্যেতে পুরুষং পুরুষর্ষভ ।
সমদুঃখসুখং ধীরং সোঽমৃতত্বায় কল্পতে ॥ ২-১৫॥

নাসতো বিদ্যতে ভাবো নাভাবো বিদ্যতে সতঃ ।
উভয়োরপি দৃষ্টোঽন্তস্ত্বনয়োস্তত্ত্বদর্শিভিঃ ॥ ২-১৬॥

অবিনাশি তু তদ্বিদ্ধি যেন সর্বমিদং ততম্ ।
বিনাশমব্যয়স্যাস্য ন কশ্চিত্কর্তুমর্হতি ॥ ২-১৭॥

BACK TO TOP

অন্তবন্ত ইমে দেহা নিত্যস্যোক্তাঃ শরীরিণঃ ।
অনাশিনোঽপ্রমেয়স্য তস্মাদ্যুধ্যস্ব ভারত ॥ ২-১৮॥

য় এনং বেত্তি হন্তারং য়শ্চৈনং মন্যতে হতম্ ।
উভৌ তৌ ন বিজানীতো নায়ং হন্তি ন হন্যতে ॥ ২-১৯॥

ন জায়তে ম্রিয়তে বা কদাচিন্
নায়ং ভূত্বা ভবিতা বা ন ভূয়ঃ ।
অজো নিত্যঃ শাশ্বতোঽয়ং পুরাণো
ন হন্যতে হন্যমানে শরীরে ॥ ২-২০॥

বেদাবিনাশিনং নিত্যং য় এনমজমব্যয়ম্ ।
কথং স পুরুষঃ পার্থ কং ঘাতয়তি হন্তি কম্ ॥ ২-২১॥

বাসাংসি জীর্ণানি য়থা বিহায়
নবানি গৃহ্ণাতি নরোঽপরাণি ।
তথা শরীরাণি বিহায় জীর্ণা-
ন্যন্যানি সংয়াতি নবানি দেহী ॥ ২-২২॥

নৈনং ছিন্দন্তি শস্ত্রাণি নৈনং দহতি পাবকঃ ।
ন চৈনং ক্লেদয়ন্ত্যাপো ন শোষয়তি মারুতঃ ॥ ২-২৩॥

অচ্ছেদ্যোঽয়মদাহ্যোঽয়মক্লেদ্যোঽশোষ্য এব চ ।
নিত্যঃ সর্বগতঃ স্থাণুরচলোঽয়ং সনাতনঃ ॥ ২-২৪॥

অব্যক্তোঽয়মচিন্ত্যোঽয়মবিকার্যোঽয়মুচ্যতে ।
তস্মাদেবং বিদিত্বৈনং নানুশোচিতুমর্হসি ॥ ২-২৫॥

অথ চৈনং নিত্যজাতং নিত্যং বা মন্যসে মৃতম্ ।
তথাপি ত্বং মহাবাহো নৈবং শোচিতুমর্হসি ॥ ২-২৬॥

জাতস্য হি ধ্রুবো মৃত্যুর্ধ্রুবং জন্ম মৃতস্য চ ।
তস্মাদপরিহার্যেঽর্থে ন ত্বং শোচিতুমর্হসি ॥ ২-২৭॥

অব্যক্তাদীনি ভূতানি ব্যক্তমধ্যানি ভারত ।
অব্যক্তনিধনান্যেব তত্র কা পরিদেবনা ॥ ২-২৮॥

আশ্চর্যবত্পশ্যতি কশ্চিদেন-
মাশ্চর্যবদ্বদতি তথৈব চান্যঃ ।
আশ্চর্যবচ্চৈনমন্যঃ শৃণোতি
শ্রুত্বাপ্যেনং বেদ ন চৈব কশ্চিত্ ॥ ২-২৯॥

দেহী নিত্যমবধ্যোঽয়ং দেহে সর্বস্য ভারত ।
তস্মাত্সর্বাণি ভূতানি ন ত্বং শোচিতুমর্হসি ॥ ২-৩০॥

স্বধর্মমপি চাবেক্ষ্য ন বিকম্পিতুমর্হসি ।

BACK TO TOP

ধর্ম্যাদ্ধি য়ুদ্ধাচ্ছ্রেয়োঽন্যত্ক্ষত্রিয়স্য ন বিদ্যতে ॥ ২-৩১॥

য়দৃচ্ছয়া চোপপন্নং স্বর্গদ্বারমপাবৃতম্ ।
সুখিনঃ ক্ষত্রিয়াঃ পার্থ লভন্তে য়ুদ্ধমীদৃশম্ ॥ ২-৩২॥

অথ চেত্ত্বমিমং ধর্ম্যং সঙ্গ্রামং ন করিষ্যসি ।
ততঃ স্বধর্মং কীর্তিং চ হিত্বা পাপমবাপ্স্যসি ॥ ২-৩৩॥

অকীর্তিং চাপি ভূতানি কথয়িষ্যন্তি তেঽব্যয়াম্ ।
সম্ভাবিতস্য চাকীর্তির্মরণাদতিরিচ্যতে ॥ ২-৩৪॥

ভয়াদ্রণাদুপরতং মংস্যন্তে ত্বাং মহারথাঃ ।
য়েষাং চ ত্বং বহুমতো ভূত্বা য়াস্যসি লাঘবম্ ॥ ২-৩৫॥

অবাচ্যবাদাংশ্চ বহূন্বদিষ্যন্তি তবাহিতাঃ ।
নিন্দন্তস্তব সামর্থ্যং ততো দুঃখতরং নু কিম্ ॥ ২-৩৬॥

হতো বা প্রাপ্স্যসি স্বর্গং জিত্বা বা ভোক্ষ্যসে মহীম্ ।
তস্মাদুত্তিষ্ঠ কৌন্তেয় য়ুদ্ধায় কৃতনিশ্চয়ঃ ॥ ২-৩৭॥

সুখদুঃখে সমে কৃত্বা লাভালাভৌ জয়াজয়ৌ ।
ততো য়ুদ্ধায় য়ুজ্যস্ব নৈবং পাপমবাপ্স্যসি ॥ ২-৩৮॥

এষা তেঽভিহিতা সাঙ্খ্যে বুদ্ধির্যোগে ত্বিমাং শৃণু ।
বুদ্ধ্যা য়ুক্তো য়য়া পার্থ কর্মবন্ধং প্রহাস্যসি ॥ ২-৩৯॥

নেহাভিক্রমনাশোঽস্তি প্রত্যবায়ো ন বিদ্যতে ।
স্বল্পমপ্যস্য ধর্মস্য ত্রায়তে মহতো ভয়াত্ ॥ ২-৪০॥

ব্যবসায়াত্মিকা বুদ্ধিরেকেহ কুরুনন্দন ।
বহুশাখা হ্যনন্তাশ্চ বুদ্ধয়োঽব্যবসায়িনাম্ ॥ ২-৪১॥

য়ামিমাং পুষ্পিতাং বাচং প্রবদন্ত্যবিপশ্চিতঃ ।
বেদবাদরতাঃ পার্থ নান্যদস্তীতি বাদিনঃ ॥ ২-৪২॥

কামাত্মানঃ স্বর্গপরা জন্মকর্মফলপ্রদাম্ ।
ক্রিয়াবিশেষবহুলাং ভোগৈশ্বর্যগতিং প্রতি ॥ ২-৪৩॥

ভোগৈশ্বর্যপ্রসক্তানাং তয়াপহৃতচেতসাম্ ।
ব্যবসায়াত্মিকা বুদ্ধিঃ সমাধৌ ন বিধীয়তে ॥ ২-৪৪॥

ত্রৈগুণ্যবিষয়া বেদা নিস্ত্রৈগুণ্যো ভবার্জুন ।
নির্দ্বন্দ্বো নিত্যসত্ত্বস্থো নির্যোগক্ষেম আত্মবান্ ॥ ২-৪৫॥

য়াবানর্থ উদপানে সর্বতঃ সম্প্লুতোদকে ।
তাবান্সর্বেষু বেদেষু ব্রাহ্মণস্য বিজানতঃ ॥ ২-৪৬॥

BACK TO TOP

কর্মণ্যেবাধিকারস্তে মা ফলেষু কদাচন ।
মা কর্মফলহেতুর্ভূর্মা তে সঙ্গোঽস্ত্বকর্মণি ॥ ২-৪৭॥

য়োগস্থঃ কুরু কর্মাণি সঙ্গং ত্যক্ত্বা ধনঞ্জয় ।
সিদ্ধ্যসিদ্ধ্যোঃ সমো ভূত্বা সমত্বং য়োগ উচ্যতে ॥ ২-৪৮॥

দূরেণ হ্যবরং কর্ম বুদ্ধিয়োগাদ্ধনঞ্জয় ।
বুদ্ধৌ শরণমন্বিচ্ছ কৃপণাঃ ফলহেতবঃ ॥ ২-৪৯॥

বুদ্ধিয়ুক্তো জহাতীহ উভে সুকৃতদুষ্কৃতে ।
তস্মাদ্যোগায় য়ুজ্যস্ব য়োগঃ কর্মসু কৌশলম্ ॥ ২-৫০॥

কর্মজং বুদ্ধিয়ুক্তা হি ফলং ত্যক্ত্বা মনীষিণঃ ।
জন্মবন্ধবিনির্মুক্তাঃ পদং গচ্ছন্ত্যনাময়ম্ ॥ ২-৫১॥

য়দা তে মোহকলিলং বুদ্ধির্ব্যতিতরিষ্যতি ।
তদা গন্তাসি নির্বেদং শ্রোতব্যস্য শ্রুতস্য চ ॥ ২-৫২॥

শ্রুতিবিপ্রতিপন্না তে য়দা স্থাস্যতি নিশ্চলা ।
সমাধাবচলা বুদ্ধিস্তদা য়োগমবাপ্স্যসি ॥ ২-৫৩॥

অর্জুন উবাচ ।

স্থিতপ্রজ্ঞস্য কা ভাষা সমাধিস্থস্য কেশব ।
স্থিতধীঃ কিং প্রভাষেত কিমাসীত ব্রজেত কিম্ ॥ ২-৫৪॥

শ্রীভগবানুবাচ ।

প্রজহাতি য়দা কামান্সর্বান্পার্থ মনোগতান্ ।
আত্মন্যেবাত্মনা তুষ্টঃ স্থিতপ্রজ্ঞস্তদোচ্যতে ॥ ২-৫৫॥

দুঃখেষ্বনুদ্বিগ্নমনাঃ সুখেষু বিগতস্পৃহঃ ।
বীতরাগভয়ক্রোধঃ স্থিতধীর্মুনিরুচ্যতে ॥ ২-৫৬॥

য়ঃ সর্বত্রানভিস্নেহস্তত্তত্প্রাপ্য শুভাশুভম্ ।
নাভিনন্দতি ন দ্বেষ্টি তস্য প্রজ্ঞা প্রতিষ্ঠিতা ॥ ২-৫৭॥

য়দা সংহরতে চায়ং কূর্মোঽঙ্গানীব সর্বশঃ ।
ইন্দ্রিয়াণীন্দ্রিয়ার্থেভ্যস্তস্য প্রজ্ঞা প্রতিষ্ঠিতা ॥ ২-৫৮॥

বিষয়া বিনিবর্তন্তে নিরাহারস্য দেহিনঃ ।
রসবর্জং রসোঽপ্যস্য পরং দৃষ্ট্বা নিবর্ততে ॥ ২-৫৯॥

য়ততো হ্যপি কৌন্তেয় পুরুষস্য বিপশ্চিতঃ ।
ইন্দ্রিয়াণি প্রমাথীনি হরন্তি প্রসভং মনঃ ॥ ২-৬০॥

তানি সর্বাণি সংয়ম্য য়ুক্ত আসীত মত্পরঃ ।

BACK TO TOP

বশে হি য়স্যেন্দ্রিয়াণি তস্য প্রজ্ঞা প্রতিষ্ঠিতা ॥ ২-৬১॥

ধ্যায়তো বিষয়ান্পুংসঃ সঙ্গস্তেষূপজায়তে ।
সঙ্গাত্সঞ্জায়তে কামঃ কামাত্ক্রোধোঽভিজায়তে ॥ ২-৬২॥

ক্রোধাদ্ভবতি সম্মোহঃ সম্মোহাত্স্মৃতিবিভ্রমঃ ।
স্মৃতিভ্রংশাদ্ বুদ্ধিনাশো বুদ্ধিনাশাত্প্রণশ্যতি ॥ ২-৬৩॥

রাগদ্বেষবিমুক্তৈস্তু বিষয়ানিন্দ্রিয়ৈশ্চরন্ । orবিয়ুক্তৈস্তু
আত্মবশ্যৈর্বিধেয়াত্মা প্রসাদমধিগচ্ছতি ॥ ২-৬৪॥

প্রসাদে সর্বদুঃখানাং হানিরস্যোপজায়তে ।
প্রসন্নচেতসো হ্যাশু বুদ্ধিঃ পর্যবতিষ্ঠতে ॥ ২-৬৫॥

নাস্তি বুদ্ধিরয়ুক্তস্য ন চায়ুক্তস্য ভাবনা ।
ন চাভাবয়তঃ শান্তিরশান্তস্য কুতঃ সুখম্ ॥ ২-৬৬॥

ইন্দ্রিয়াণাং হি চরতাং য়ন্মনোঽনুবিধীয়তে ।
তদস্য হরতি প্রজ্ঞাং বায়ুর্নাবমিবাম্ভসি ॥ ২-৬৭॥

তস্মাদ্যস্য মহাবাহো নিগৃহীতানি সর্বশঃ ।
ইন্দ্রিয়াণীন্দ্রিয়ার্থেভ্যস্তস্য প্রজ্ঞা প্রতিষ্ঠিতা ॥ ২-৬৮॥

য়া নিশা সর্বভূতানাং তস্যাং জাগর্তি সংয়মী ।
য়স্যাং জাগ্রতি ভূতানি সা নিশা পশ্যতো মুনেঃ ॥ ২-৬৯॥

আপূর্যমাণমচলপ্রতিষ্ঠং
    সমুদ্রমাপঃ প্রবিশন্তি য়দ্বত্ ।
তদ্বত্কামা য়ং প্রবিশন্তি সর্বে
    স শান্তিমাপ্নোতি ন কামকামী ॥ ২-৭০॥

বিহায় কামান্যঃ সর্বান্পুমাংশ্চরতি নিঃস্পৃহঃ ।
নির্মমো নিরহঙ্কারঃ স শান্তিমধিগচ্ছতি ॥ ২-৭১॥

এষা ব্রাহ্মী স্থিতিঃ পার্থ নৈনাং প্রাপ্য বিমুহ্যতি ।
স্থিত্বাস্যামন্তকালেঽপি ব্রহ্মনির্বাণমৃচ্ছতি ॥ ২-৭২॥

ওঁ তত্সদিতি শ্রীমদ্ভগবদ্গীতাসূপনিষত্সু
ব্রহ্মবিদ্যায়াং য়োগশাস্ত্রে শ্রীকৃষ্ণার্জুনসংবাদে
সাঙ্খ্যয়োগো নাম দ্বিতীয়োঽধ্যায়ঃ ॥ ২॥

অথ তৃতীয়োঽধ্যায়ঃ । কর্ময়োগঃ

অর্জুন উবাচ ।

জ্যায়সী চেত্কর্মণস্তে মতা বুদ্ধির্জনার্দন ।
তত্কিং কর্মণি ঘোরে মাং নিয়োজয়সি কেশব ॥ ৩-১॥

BACK TO TOP

ব্যামিশ্রেণেব বাক্যেন বুদ্ধিং মোহয়সীব মে ।
তদেকং বদ নিশ্চিত্য য়েন শ্রেয়োঽহমাপ্নুয়াম্ ॥ ৩-২॥

শ্রীভগবানুবাচ ।

লোকেঽস্মিন্ দ্বিবিধা নিষ্ঠা পুরা প্রোক্তা ময়ানঘ ।
জ্ঞানয়োগেন সাঙ্খ্যানাং কর্ময়োগেন য়োগিনাম্ ॥ ৩-৩॥

ন কর্মণামনারম্ভান্নৈষ্কর্ম্যং পুরুষোঽশ্নুতে ।
ন চ সংন্যসনাদেব সিদ্ধিং সমধিগচ্ছতি ॥ ৩-৪॥

ন হি কশ্চিত্ক্ষণমপি জাতু তিষ্ঠত্যকর্মকৃত্ ।
কার্যতে হ্যবশঃ কর্ম সর্বঃ প্রকৃতিজৈর্গুণৈঃ ॥ ৩-৫॥

কর্মেন্দ্রিয়াণি সংয়ম্য য় আস্তে মনসা স্মরন্ ।
ইন্দ্রিয়ার্থান্বিমূঢাত্মা মিথ্যাচারঃ স উচ্যতে ॥ ৩-৬॥

য়স্ত্বিন্দ্রিয়াণি মনসা নিয়ম্যারভতেঽর্জুন ।
কর্মেন্দ্রিয়ৈঃ কর্ময়োগমসক্তঃ স বিশিষ্যতে ॥ ৩-৭॥

নিয়তং কুরু কর্ম ত্বং কর্ম জ্যায়ো হ্যকর্মণঃ ।
শরীরয়াত্রাপি চ তে ন প্রসিদ্ধ্যেদকর্মণঃ ॥ ৩-৮॥

য়জ্ঞার্থাত্কর্মণোঽন্যত্র লোকোঽয়ং কর্মবন্ধনঃ ।
তদর্থং কর্ম কৌন্তেয় মুক্তসঙ্গঃ সমাচর ॥ ৩-৯॥

সহয়জ্ঞাঃ প্রজাঃ সৃষ্ট্বা পুরোবাচ প্রজাপতিঃ ।
অনেন প্রসবিষ্যধ্বমেষ বোঽস্ত্বিষ্টকামধুক্ ॥ ৩-১০॥

দেবান্ভাবয়তানেন তে দেবা ভাবয়ন্তু বঃ ।
পরস্পরং ভাবয়ন্তঃ শ্রেয়ঃ পরমবাপ্স্যথ ॥ ৩-১১॥

ইষ্টান্ভোগান্হি বো দেবা দাস্যন্তে য়জ্ঞভাবিতাঃ ।
তৈর্দত্তানপ্রদায়ৈভ্যো য়ো ভুঙ্ক্তে স্তেন এব সঃ ॥ ৩-১২॥

য়জ্ঞশিষ্টাশিনঃ সন্তো মুচ্যন্তে সর্বকিল্বিষৈঃ ।
ভুঞ্জতে তে ত্বঘং পাপা য়ে পচন্ত্যাত্মকারণাত্ ॥ ৩-১৩॥

অন্নাদ্ভবন্তি ভূতানি পর্জন্যাদন্নসম্ভবঃ ।
য়জ্ঞাদ্ভবতি পর্জন্যো য়জ্ঞঃ কর্মসমুদ্ভবঃ ॥ ৩-১৪॥

কর্ম ব্রহ্মোদ্ভবং বিদ্ধি ব্রহ্মাক্ষরসমুদ্ভবম্ ।
তস্মাত্সর্বগতং ব্রহ্ম নিত্যং য়জ্ঞে প্রতিষ্ঠিতম্ ॥ ৩-১৫॥

এবং প্রবর্তিতং চক্রং নানুবর্তয়তীহ য়ঃ ।
অঘায়ুরিন্দ্রিয়ারামো মোঘং পার্থ স জীবতি ॥ ৩-১৬॥

BACK TO TOP

য়স্ত্বাত্মরতিরেব স্যাদাত্মতৃপ্তশ্চ মানবঃ ।
আত্মন্যেব চ সন্তুষ্টস্তস্য কার্যং ন বিদ্যতে ॥ ৩-১৭॥

নৈব তস্য কৃতেনার্থো নাকৃতেনেহ কশ্চন ।
ন চাস্য সর্বভূতেষু কশ্চিদর্থব্যপাশ্রয়ঃ ॥ ৩-১৮॥

তস্মাদসক্তঃ সততং কার্যং কর্ম সমাচর ।
অসক্তো হ্যাচরন্কর্ম পরমাপ্নোতি পূরুষঃ ॥ ৩-১৯॥

কর্মণৈব হি সংসিদ্ধিমাস্থিতা জনকাদয়ঃ ।
লোকসঙ্গ্রহমেবাপি সম্পশ্যন্কর্তুমর্হসি ॥ ৩-২০॥

য়দ্যদাচরতি শ্রেষ্ঠস্তত্তদেবেতরো জনঃ ।
স য়ত্প্রমাণং কুরুতে লোকস্তদনুবর্ততে ॥ ৩-২১॥

ন মে পার্থাস্তি কর্তব্যং ত্রিষু লোকেষু কিঞ্চন ।
নানবাপ্তমবাপ্তব্যং বর্ত এব চ কর্মণি ॥ ৩-২২॥

য়দি হ্যহং ন বর্তেয়ং জাতু কর্মণ্যতন্দ্রিতঃ ।
মম বর্ত্মানুবর্তন্তে মনুষ্যাঃ পার্থ সর্বশঃ ॥ ৩-২৩॥

উত্সীদেয়ুরিমে লোকা ন কুর্যাং কর্ম চেদহম্ ।
সঙ্করস্য চ কর্তা স্যামুপহন্যামিমাঃ প্রজাঃ ॥ ৩-২৪॥

সক্তাঃ কর্মণ্যবিদ্বাংসো য়থা কুর্বন্তি ভারত ।
কুর্যাদ্বিদ্বাংস্তথাসক্তশ্চিকীর্ষুর্লোকসঙ্গ্রহম্ ॥ ৩-২৫॥

ন বুদ্ধিভেদং জনয়েদজ্ঞানাং কর্মসঙ্গিনাম্ ।
জোষয়েত্সর্বকর্মাণি বিদ্বান্যুক্তঃ সমাচরন্ ॥ ৩-২৬॥

প্রকৃতেঃ ক্রিয়মাণানি গুণৈঃ কর্মাণি সর্বশঃ ।
অহঙ্কারবিমূঢাত্মা কর্তাহমিতি মন্যতে ॥ ৩-২৭॥

তত্ত্ববিত্তু মহাবাহো গুণকর্মবিভাগয়োঃ ।
গুণা গুণেষু বর্তন্ত ইতি মত্বা ন সজ্জতে ॥ ৩-২৮॥

প্রকৃতের্গুণসম্মূঢাঃ সজ্জন্তে গুণকর্মসু ।
তানকৃত্স্নবিদো মন্দান্কৃত্স্নবিন্ন বিচালয়েত্ ॥ ৩-২৯॥

ময়ি সর্বাণি কর্মাণি সংন্যস্যাধ্যাত্মচেতসা ।
নিরাশীর্নির্মমো ভূত্বা য়ুধ্যস্ব বিগতজ্বরঃ ॥ ৩-৩০॥

য়ে মে মতমিদং নিত্যমনুতিষ্ঠন্তি মানবাঃ ।
শ্রদ্ধাবন্তোঽনসূয়ন্তো মুচ্যন্তে তেঽপি কর্মভিঃ ॥ ৩-৩১॥

য়ে ত্বেতদভ্যসূয়ন্তো নানুতিষ্ঠন্তি মে মতম্ ।

BACK TO TOP

সর্বজ্ঞানবিমূঢাংস্তাব্বিদ্ধি নষ্টানচেতসঃ ॥ ৩-৩২॥

সদৃশং চেষ্টতে স্বস্যাঃ প্রকৃতের্জ্ঞানবানপি ।
প্রকৃতিং য়ান্তি ভূতানি নিগ্রহঃ কিং করিষ্যতি ॥ ৩-৩৩॥

ইন্দ্রিয়স্যেন্দ্রিয়স্যার্থে রাগদ্বেষৌ ব্যবস্থিতৌ ।
তয়োর্ন বশমাগচ্ছেত্তৌ হ্যস্য পরিপন্থিনৌ ॥ ৩-৩৪॥

শ্রেয়ান্স্বধর্মো বিগুণঃ পরধর্মাত্স্বনুষ্ঠিতাত্ ।
স্বধর্মে নিধনং শ্রেয়ঃ পরধর্মো ভয়াবহঃ ॥ ৩-৩৫॥

অর্জুন উবাচ ।

অথ কেন প্রয়ুক্তোঽয়ং পাপং চরতি পূরুষঃ ।
অনিচ্ছন্নপি বার্ষ্ণেয় বলাদিব নিয়োজিতঃ ॥ ৩-৩৬॥

শ্রীভগবানুবাচ ।

কাম এষ ক্রোধ এষ রজোগুণসমুদ্ভবঃ ।
মহাশনো মহাপাপ্মা বিদ্ধ্যেনমিহ বৈরিণম্ ॥ ৩-৩৭॥

ধূমেনাব্রিয়তে বহ্নির্যথাদর্শো মলেন চ ।
য়থোল্বেনাবৃতো গর্ভস্তথা তেনেদমাবৃতম্ ॥ ৩-৩৮॥

আবৃতং জ্ঞানমেতেন জ্ঞানিনো নিত্যবৈরিণা ।
কামরূপেণ কৌন্তেয় দুষ্পূরেণানলেন চ ॥ ৩-৩৯॥

ইন্দ্রিয়াণি মনো বুদ্ধিরস্যাধিষ্ঠানমুচ্যতে ।
এতৈর্বিমোহয়ত্যেষ জ্ঞানমাবৃত্য দেহিনম্ ॥ ৩-৪০॥

তস্মাত্ত্বমিন্দ্রিয়াণ্যাদৌ নিয়ম্য ভরতর্ষভ ।
পাপ্মানং প্রজহি হ্যেনং জ্ঞানবিজ্ঞাননাশনম্ ॥ ৩-৪১॥

ইন্দ্রিয়াণি পরাণ্যাহুরিন্দ্রিয়েভ্যঃ পরং মনঃ ।
মনসস্তু পরা বুদ্ধির্যো বুদ্ধেঃ পরতস্তু সঃ ॥ ৩-৪২॥

এবং বুদ্ধেঃ পরং বুদ্ধ্বা সংস্তভ্যাত্মানমাত্মনা ।
জহি শত্রুং মহাবাহো কামরূপং দুরাসদম্ ॥ ৩-৪৩॥

ওঁ তত্সদিতি শ্রীমদ্ভগবদ্গীতাসূপনিষত্সু
ব্রহ্মবিদ্যায়াং য়োগশাস্ত্রে শ্রীকৃষ্ণার্জুনসংবাদে
কর্ময়োগো নাম তৃতীয়োঽধ্যায়ঃ ॥ ৩॥

অথ চতুর্থোঽধ্যায়ঃ । জ্ঞানকর্মসংন্যাসয়োগঃ

শ্রীভগবানুবাচ ।

BACK TO TOP

ইমং বিবস্বতে য়োগং প্রোক্তবানহমব্যয়ম্ ।
বিবস্বান্মনবে প্রাহ মনুরিক্ষ্বাকবেঽব্রবীত্ ॥ ৪-১॥

এবং পরম্পরাপ্রাপ্তমিমং রাজর্ষয়ো বিদুঃ ।
স কালেনেহ মহতা য়োগো নষ্টঃ পরন্তপ ॥ ৪-২॥

স এবায়ং ময়া তেঽদ্য য়োগঃ প্রোক্তঃ পুরাতনঃ ।
ভক্তোঽসি মে সখা চেতি রহস্যং হ্যেতদুত্তমম্ ॥ ৪-৩॥

অর্জুন উবাচ ।

অপরং ভবতো জন্ম পরং জন্ম বিবস্বতঃ ।
কথমেতদ্বিজানীয়াং ত্বমাদৌ প্রোক্তবানিতি ॥ ৪-৪॥

শ্রীভগবানুবাচ ।

বহূনি মে ব্যতীতানি জন্মানি তব চার্জুন ।
তান্যহং বেদ সর্বাণি ন ত্বং বেত্থ পরন্তপ ॥ ৪-৫॥

অজোঽপি সন্নব্যয়াত্মা ভূতানামীশ্বরোঽপি সন্ ।
প্রকৃতিং স্বামধিষ্ঠায় সম্ভবাম্যাত্মমায়য়া ॥ ৪-৬॥

য়দা য়দা হি ধর্মস্য গ্লানির্ভবতি ভারত ।
অভ্যুত্থানমধর্মস্য তদাত্মানং সৃজাম্যহম্ ॥ ৪-৭॥

পরিত্রাণায় সাধূনাং বিনাশায় চ দুষ্কৃতাম্ ।
ধর্মসংস্থাপনার্থায় সম্ভবামি য়ুগে য়ুগে ॥ ৪-৮॥

জন্ম কর্ম চ মে দিব্যমেবং য়ো বেত্তি তত্ত্বতঃ ।
ত্যক্ত্বা দেহং পুনর্জন্ম নৈতি মামেতি সোঽর্জুন ॥ ৪-৯॥

বীতরাগভয়ক্রোধা মন্ময়া মামুপাশ্রিতাঃ ।
বহবো জ্ঞানতপসা পূতা মদ্ভাবমাগতাঃ ॥ ৪-১০॥

য়ে য়থা মাং প্রপদ্যন্তে তাংস্তথৈব ভজাম্যহম্ ।
মম বর্ত্মানুবর্তন্তে মনুষ্যাঃ পার্থ সর্বশঃ ॥ ৪-১১॥

কাঙ্ক্ষন্তঃ কর্মণাং সিদ্ধিং য়জন্ত ইহ দেবতাঃ ।
ক্ষিপ্রং হি মানুষে লোকে সিদ্ধির্ভবতি কর্মজা ॥ ৪-১২॥

চাতুর্বর্ণ্যং ময়া সৃষ্টং গুণকর্মবিভাগশঃ ।
তস্য কর্তারমপি মাং বিদ্ধ্যকর্তারমব্যয়ম্ ॥ ৪-১৩॥

ন মাং কর্মাণি লিম্পন্তি ন মে কর্মফলে স্পৃহা ।
ইতি মাং য়োঽভিজানাতি কর্মভির্ন স বধ্যতে ॥ ৪-১৪॥

এবং জ্ঞাত্বা কৃতং কর্ম পূর্বৈরপি মুমুক্ষুভিঃ ।

কুরু কর্মৈব তস্মাত্ত্বং পূর্বৈঃ পূর্বতরং কৃতম্ ॥ ৪-১৫॥

কিং কর্ম কিমকর্মেতি কবয়োঽপ্যত্র মোহিতাঃ ।
তত্তে কর্ম প্রবক্ষ্যামি য়জ্জ্ঞাত্বা মোক্ষ্যসেঽশুভাত্ ॥ ৪-১৬॥

কর্মণো হ্যপি বোদ্ধব্যং বোদ্ধব্যং চ বিকর্মণঃ ।
অকর্মণশ্চ বোদ্ধব্যং গহনা কর্মণো গতিঃ ॥ ৪-১৭॥

কর্মণ্যকর্ম য়ঃ পশ্যেদকর্মণি চ কর্ম য়ঃ ।
স বুদ্ধিমান্মনুষ্যেষু স য়ুক্তঃ কৃত্স্নকর্মকৃত্ ॥ ৪-১৮॥

য়স্য সর্বে সমারম্ভাঃ কামসঙ্কল্পবর্জিতাঃ ।
জ্ঞানাগ্নিদগ্ধকর্মাণং তমাহুঃ পণ্ডিতং বুধাঃ ॥ ৪-১৯॥

ত্যক্ত্বা কর্মফলাসঙ্গং নিত্যতৃপ্তো নিরাশ্রয়ঃ ।
কর্মণ্যভিপ্রবৃত্তোঽপি নৈব কিঞ্চিত্করোতি সঃ ॥ ৪-২০॥

নিরাশীর্য়তচিত্তাত্মা ত্যক্তসর্বপরিগ্রহঃ ।
শারীরং কেবলং কর্ম কুর্বন্নাপ্নোতি কিল্বিষম্ ॥ ৪-২১॥

য়দৃচ্ছালাভসন্তুষ্টো দ্বন্দ্বাতীতো বিমত্সরঃ ।
সমঃ সিদ্ধাবসিদ্ধৌ চ কৃত্বাপি ন নিবধ্যতে ॥ ৪-২২॥

গতসঙ্গস্য মুক্তস্য জ্ঞানাবস্থিতচেতসঃ ।
য়জ্ঞায়াচরতঃ কর্ম সমগ্রং প্রবিলীয়তে ॥ ৪-২৩॥

ব্রহ্মার্পণং ব্রহ্ম হবির্ব্রহ্মাগ্নৌ ব্রহ্মণা হুতম্ ।
ব্রহ্মৈব তেন গন্তব্যং ব্রহ্মকর্মসমাধিনা ॥ ৪-২৪॥

দৈবমেবাপরে য়জ্ঞং য়োগিনঃ পর্য়ুপাসতে ।
ব্রহ্মাগ্নাবপরে য়জ্ঞং য়জ্ঞেনৈবোপজুহ্বতি ॥ ৪-২৫॥

শ্রোত্রাদীনীন্দ্রিয়াণ্যন্যে সংয়মাগ্নিষু জুহ্বতি ।
শব্দাদীন্বিষয়ানন্য ইন্দ্রিয়াগ্নিষু জুহ্বতি ॥ ৪-২৬॥

সর্বাণীন্দ্রিয়কর্মাণি প্রাণকর্মাণি চাপরে ।
আত্মসংয়ময়োগাগ্নৌ জুহ্বতি জ্ঞানদীপিতে ॥ ৪-২৭॥

দ্রব্যয়জ্ঞাস্তপোয়জ্ঞা য়োগয়জ্ঞাস্তথাপরে ।
স্বাধ্যায়জ্ঞানয়জ্ঞাশ্চ য়তয়ঃ সংশিতব্রতাঃ ॥ ৪-২৮॥

অপানে জুহ্বতি প্রাণং প্রাণেঽপানং তথাপরে ।
প্রাণাপানগতী রুদ্ধ্বা প্রাণায়ামপরায়ণাঃ ॥ ৪-২৯॥

অপরে নিয়তাহারাঃ প্রাণান্প্রাণেষু জুহ্বতি ।
সর্বেঽপ্যেতে য়জ্ঞবিদো য়জ্ঞক্ষপিতকল্মষাঃ ॥ ৪-৩০॥

BACK TO TOP

যজ্ঞশিষ্টামৃতভুজো যান্তি ব্রহ্ম সনাতনম্ ।
নায়ং লোকোঽস্ত্যযজ্ঞস্য কুতোঽন্যঃ কুরুসত্তম ॥ ৪-৩১॥

এবং বহুবিধা যজ্ঞা বিততা ব্রহ্মণো মুখে ।
কর্মজান্বিদ্ধি তান্সর্বানেবং জ্ঞাত্বা বিমোক্ষ্যসে ॥ ৪-৩২॥

শ্রেয়ান্দ্রব্যময়াদ্যজ্ঞাজ্জ্ঞানযজ্ঞঃ পরন্তপ ।
সর্বং কর্মাখিলং পার্থ জ্ঞানে পরিসমাপ্যতে ॥ ৪-৩৩॥

তদ্বিদ্ধি প্রণিপাতেন পরিপ্রশ্নেন সেবয়া ।
উপদেক্ষ্যন্তি তে জ্ঞানং জ্ঞানিনস্তত্ত্বদর্শিনঃ ॥ ৪-৩৪॥

যজ্জ্ঞাত্বা ন পুনর্মোহমেবং যাস্যসি পাণ্ডব ।
যেন ভূতান্যশেষেণ দ্রক্ষ্যস্যাত্মন্যথো ময়ি ॥ ৪-৩৫॥ **var** অশেষাণি

অপি চেদসি পাপেভ্যঃ সর্বেভ্যঃ পাপকৃত্তমঃ ।
সর্বং জ্ঞানপ্লবেনৈব বৃজিনং সন্তরিষ্যসি ॥ ৪-৩৬॥

যথৈধাংসি সমিদ্ধোঽগ্নির্ভস্মসাত্কুরুতেঽর্জুন ।
জ্ঞানাগ্নিঃ সর্বকর্মাণি ভস্মসাত্কুরুতে তথা ॥ ৪-৩৭॥

ন হি জ্ঞানেন সদৃশং পবিত্রমিহ বিদ্যতে ।
তত্স্বয়ং যোগসংসিদ্ধঃ কালেনাত্মনি বিন্দতি ॥ ৪-৩৮॥

শ্রদ্ধাবাঁল্লভতে জ্ঞানং তত্পরঃ সংযতেন্দ্রিয়ঃ ।
জ্ঞানং লব্ধ্বা পরাং শান্তিমচিরেণাধিগচ্ছতি ॥ ৪-৩৯॥

অজ্ঞশ্চাশ্রদ্দধানশ্চ সংশয়াত্মা বিনশ্যতি ।
নায়ং লোকোঽস্তি ন পরো ন সুখং সংশয়াত্মনঃ ॥ ৪-৪০॥

যোগসংন্যস্তকর্মাণং জ্ঞানসঞ্ছিন্নসংশয়ম্ ।
আত্মবন্তং ন কর্মাণি নিবধ্নন্তি ধনঞ্জয় ॥ ৪-৪১॥

তস্মাদজ্ঞানসম্ভূতং হৃত্স্থং জ্ঞানাসিনাত্মনঃ ।
ছিত্ত্বৈনং সংশয়ং যোগমাতিষ্ঠোত্তিষ্ঠ ভারত ॥ ৪-৪২॥

ওঁ তত্সদিতি শ্রীমদ্ভগবদ্গীতাসূপনিষত্সু
ব্রহ্মবিদ্যায়াং যোগশাস্ত্রে শ্রীকৃষ্ণার্জুনসংবাদে
জ্ঞানকর্মসংন্যাসযোগো নাম চতুর্থোঽধ্যায়ঃ ॥ ৪॥

অথ পঞ্চমোঽধ্যায়ঃ । সংন্যাসযোগঃ

অর্জুন উবাচ ।

সংন্যাসং কর্মণাং কৃষ্ণ পুনর্যোগং চ শংসসি ।
যচ্ছ্রেয় এতয়োরেকং তন্মে ব্রূহি সুনিশ্চিতম্ ॥ ৫-১॥

BACK TO TOP

শ্রীভগবানুবাচ।

সংন্যাসঃ কর্মযোগশ্চ নিঃশ্রেয়সকরাবুভৌ।
তয়োস্তু কর্মসংন্যাসাত্কর্মযোগো বিশিষ্যতে ॥ ৫-২॥

জ্ঞেয়ঃ স নিত্যসংন্যাসী যো ন দ্বেষ্টি ন কাঙ্ক্ষতি।
নির্দ্বন্দ্বো হি মহাবাহো সুখং বন্ধাত্প্রমুচ্যতে ॥ ৫-৩॥

সাঙ্খ্যযোগৌ পৃথগ্বালাঃ প্রবদন্তি ন পণ্ডিতাঃ।
একমপ্যাস্থিতঃ সম্যগুভয়োর্বিন্দতে ফলম্ ॥ ৫-৪॥

যত্সাঙ্খ্যৈঃ প্রাপ্যতে স্থানং তদ্যোগৈরপি গম্যতে।
একং সাঙ্খ্যং চ যোগং চ যঃ পশ্যতি স পশ্যতি ॥ ৫-৫॥

সংন্যাসস্তু মহাবাহো দুঃখমাপ্তুমযোগতঃ।
যোগযুক্তো মুনির্ব্রহ্ম নচিরেণাধিগচ্ছতি ॥ ৫-৬॥

যোগযুক্তো বিশুদ্ধাত্মা বিজিতাত্মা জিতেন্দ্রিয়ঃ।
সর্বভূতাত্মভূতাত্মা কুর্বন্নপি ন লিপ্যতে ॥ ৫-৭॥

নৈব কিঞ্চিত্করোমীতি যুক্তো মন্যেত তত্ত্ববিত্।
পশ্যঞ্শৃণ্বন্স্পৃশঞ্জিঘ্রন্নশ্নন্গচ্ছন্স্বপঞ্শ্বসন্ ॥ ৫-৮॥

প্রলপন্বিসৃজন্গৃহ্ণন্নুন্মিষন্নিমিষন্নপি।
ইন্দ্রিয়াণীন্দ্রিয়ার্থেষু বর্তন্ত ইতি ধারয়ন্ ॥ ৫-৯॥

ব্রহ্মণ্যাধায় কর্মাণি সঙ্গং ত্যক্ত্বা করোতি যঃ।
লিপ্যতে ন স পাপেন পদ্মপত্রমিবাম্ভসা ॥ ৫-১০॥

কায়েন মনসা বুদ্ধ্যা কেবলৈরিন্দ্রিয়ৈরপি।
যোগিনঃ কর্ম কুর্বন্তি সঙ্গং ত্যক্ত্বাত্মশুদ্ধয়ে ॥ ৫-১১॥

যুক্তঃ কর্মফলং ত্যক্ত্বা শান্তিমাপ্নোতি নৈষ্ঠিকীম্।
অযুক্তঃ কামকারেণ ফলে সক্তো নিবধ্যতে ॥ ৫-১২॥

সর্বকর্মাণি মনসা সংন্যস্যাস্তে সুখং বশী।
নবদ্বারে পুরে দেহী নৈব কুর্বন্ন কারয়ন্ ॥ ৫-১৩॥

ন কর্তৃত্বং ন কর্মাণি লোকস্য সৃজতি প্রভুঃ।
ন কর্মফলসংয়োগং স্বভাবস্তু প্রবর্ততে ॥ ৫-১৪॥

নাদত্তে কস্যচিত্পাপং ন চৈব সুকৃতং বিভুঃ।
অজ্ঞানেনাবৃতং জ্ঞানং তেন মুহ্যন্তি জন্তবঃ ॥ ৫-১৫॥

জ্ঞানেন তু তদজ্ঞানং যেষাং নাশিতমাত্মনঃ।
তেষামাদিত্যবজ্জ্ঞানং প্রকাশয়তি তত্পরম্ ॥ ৫-১৬॥

BACK TO TOP

তদ্বুদ্ধয়স্তদাত্মানস্তন্নিষ্ঠাস্তত্পরায়ণাঃ ।
গচ্ছন্ত্যপুনরাবৃত্তিং জ্ঞাননির্ধূতকল্মষাঃ ॥ ৫-১৭॥

বিদ্যাবিনয়সম্পন্নে ব্রাহ্মণে গবি হস্তিনি ।
শুনি চৈব শ্বপাকে চ পণ্ডিতাঃ সমদর্শিনঃ ॥ ৫-১৮॥

ইহৈব তৈর্জিতঃ সর্গো য়েষাং সাম্যে স্থিতং মনঃ ।
নির্দোষং হি সমং ব্রহ্ম তস্মাদ্ ব্রহ্মণি তে স্থিতাঃ ॥ ৫-১৯॥

ন প্রহৃষ্যেত্প্রিয়ং প্রাপ্য নোদ্বিজেত্প্রাপ্য চাপ্রিয়ম্ ।
স্থিরবুদ্ধিরসম্মূঢো ব্রহ্মবিদ্ ব্রহ্মণি স্থিতঃ ॥ ৫-২০॥

বাহ্যস্পর্শেষ্বসক্তাত্মা বিন্দত্যাত্মনি য়ত্সুখম্ ।
স ব্রহ্ময়োগয়ুক্তাত্মা সুখমক্ষয়মশ্নুতে ॥ ৫-২১॥

য়ে হি সংস্পর্শজা ভোগা দুঃখয়োনয় এব তে ।
আদ্যন্তবন্তঃ কৌন্তেয় ন তেষু রমতে বুধঃ ॥ ৫-২২॥

শক্নোতীহৈব য়ঃ সোঢুং প্রাক্শরীরবিমোক্ষণাত্ ।
কামক্রোধোদ্ভবং বেগং স য়ুক্তঃ স সুখী নরঃ ॥ ৫-২৩॥

য়োঽন্তঃসুখোঽন্তরারামস্তথান্তর্জ্যোতিরেব য়ঃ ।
স য়োগী ব্রহ্মনির্বাণং ব্রহ্মভূতোঽধিগচ্ছতি ॥ ৫-২৪॥

লভন্তে ব্রহ্মনির্বাণমৃষয়ঃ ক্ষীণকল্মষাঃ ।
ছিন্নদ্বৈধা য়তাত্মানঃ সর্বভূতহিতে রতাঃ ॥ ৫-২৫॥

কামক্রোধবিয়ুক্তানাং য়তীনাং য়তচেতসাম্ ।
অভিতো ব্রহ্মনির্বাণং বর্ততে বিদিতাত্মনাম্ ॥ ৫-২৬॥

স্পর্শান্কৃত্বা বহির্বাহ্যাংশ্চক্ষুশ্চৈবান্তরে ভ্রুবোঃ ।
প্রাণাপানৌ সমৌ কৃত্বা নাসাভ্যন্তরচারিণৌ ॥ ৫-২৭॥

য়তেন্দ্রিয়মনোবুদ্ধির্মুনির্মোক্ষপরায়ণঃ ।
বিগতেচ্ছাভয়ক্রোধো য়ঃ সদা মুক্ত এব সঃ ॥ ৫-২৮॥

ভোক্তারং য়জ্ঞতপসাং সর্বলোকমহেশ্বরম্ ।
সুহৃদং সর্বভূতানাং জ্ঞাত্বা মাং শান্তিমৃচ্ছতি ॥ ৫-২৯॥

ওঁ তত্সদিতি শ্রীমদ্ভগবদ্গীতাসূপনিষত্সু
ব্রহ্মবিদ্যায়াং য়োগশাস্ত্রে শ্রীকৃষ্ণার্জুনসংবাদে
সংন্যাসয়োগো নাম পঞ্চমোঽধ্যায়ঃ ॥ ৫॥

অথ ষষ্ঠোঽধ্যায়ঃ । আত্মসংয়ময়োগঃ

শ্রীভগবানুবাচ ।

BACK TO TOP

অনাশ্রিতঃ কর্মফলং কার্যং কর্ম করোতি য়ঃ ।
স সংন্যাসী চ য়োগী চ ন নিরগ্নির্ন চাক্রিয়ঃ ॥ ৬-১॥

য়ং সংন্যাসমিতি প্রাহুর্যোগং তং বিদ্ধি পাণ্ডব ।
ন হ্যসংন্যস্তসঙ্কল্পো য়োগী ভবতি কশ্চন ॥ ৬-২॥

আরুরুক্ষোর্মুনের্যোগং কর্ম কারণমুচ্যতে ।
য়োগারূঢস্য তস্যৈব শমঃ কারণমুচ্যতে ॥ ৬-৩॥

য়দা হি নেন্দ্রিয়ার্থেষু ন কর্মস্বনুষজ্জতে ।
সর্বসঙ্কল্পসংন্যাসী য়োগারূঢস্তদোচ্যতে ॥ ৬-৪॥

উদ্ধরেদাত্মনাত্মানং নাত্মানমবসাদয়েত্ ।
আত্মৈব হ্যাত্মনো বন্ধুরাত্মৈব রিপুরাত্মনঃ ॥ ৬-৫॥

বন্ধুরাত্মাত্মনস্তস্য য়েনাত্মৈবাত্মনা জিতঃ ।
অনাত্মনস্তু শত্রুত্বে বর্তেতাত্মৈব শত্রুবত্ ॥ ৬-৬॥

জিতাত্মনঃ প্রশান্তস্য পরমাত্মা সমাহিতঃ ।
শীতোষ্ণসুখদুঃখেষু তথা মানাপমানয়োঃ ॥ ৬-৭॥

জ্ঞানবিজ্ঞানতৃপ্তাত্মা কূটস্থো বিজিতেন্দ্রিয়ঃ ।
য়ুক্ত ইত্যুচ্যতে য়োগী সমলোষ্টাশ্মকাঞ্চনঃ ॥ ৬-৮॥

সুহৃন্মিত্রার্যুদাসীনমধ্যস্থদ্বেষ্যবন্ধুষু ।
সাধুষ্বপি চ পাপেষু সমবুদ্ধির্বিশিষ্যতে ॥ ৬-৯॥

য়োগী য়ুঞ্জীত সততমাত্মানং রহসি স্থিতঃ ।
একাকী য়তচিত্তাত্মা নিরাশীরপরিগ্রহঃ ॥ ৬-১০॥

শুচৌ দেশে প্রতিষ্ঠাপ্য স্থিরমাসনমাত্মনঃ ।
নাত্যুচ্ছ্রিতং নাতিনীচং চৈলাজিনকুশোত্তরম্ ॥ ৬-১১॥

তত্রৈকাগ্রং মনঃ কৃত্বা য়তচিত্তেন্দ্রিয়ক্রিয়ঃ ।
উপবিশ্যাসনে য়ুঞ্জ্যাদ্যোগমাত্মবিশুদ্ধয়ে ॥ ৬-১২॥

সমং কায়শিরোগ্রীবং ধারয়ন্নচলং স্থিরঃ ।
সম্প্রেক্ষ্য নাসিকাগ্রং স্বং দিশশ্চানবলোকয়ন্ ॥ ৬-১৩॥

প্রশান্তাত্মা বিগতভীর্ব্রহ্মচারিব্রতে স্থিতঃ ।
মনঃ সংয়ম্য মচ্চিত্তো য়ুক্ত আসীত মত্পরঃ ॥ ৬-১৪॥

য়ুঞ্জন্নেবং সদাত্মানং য়োগী নিয়তমানসঃ ।
শান্তিং নির্বাণপরমাং মত্সংস্থামধিগচ্ছতি ॥ ৬-১৫॥

নাত্যশ্নতস্তু য়োগোঽস্তি ন চৈকান্তমনশ্নতঃ ।
ন চাতিস্বপ্নশীলস্য জাগ্রতো নৈব চার্জুন ॥ ৬-১৬॥

BACK TO TOP

যুক্তাহারবিহারস্য  যুক্তচেষ্টস্য কর্মসু ।
যুক্তস্বপ্নাববোধস্য য়োগো ভবতি দুঃখহা ॥ ৬-১৭॥

য়দা বিনিয়তং চিত্তমাত্মন্যেবাবতিষ্ঠতে ।
নিঃস্পৃহঃ সর্বকামেভ্যো যুক্ত ইত্যুচ্যতে তদা ॥ ৬-১৮॥

য়থা দীপো নিবাতস্থো নেঙ্গতে সোপমা স্মৃতা ।
য়োগিনো য়তচিত্তস্য যুঞ্জতো য়োগমাত্মনঃ ॥ ৬-১৯॥

য়ত্রোপরমতে চিত্তং নিরুদ্ধং য়োগসেবয়া ।
য়ত্র চৈবাত্মনাত্মানং পশ্যন্নাত্মনি তুষ্যতি ॥ ৬-২০॥

সুখমাত্যন্তিকং য়ত্তদ্ বুদ্ধিগ্রাহ্যমতীন্দ্রিয়ম্ ।
বেত্তি য়ত্র ন চৈবায়ং স্থিতশ্চলতি তত্ত্বতঃ ॥ ৬-২১॥

য়ং লব্ধ্বা চাপরং লাভং মন্যতে নাধিকং ততঃ ।
য়স্মিন্স্থিতো ন দুঃখেন গুরুণাপি বিচাল্যতে ॥ ৬-২২॥

তং বিদ্যাদ্ দুঃখসংয়োগবিয়োগং য়োগসংজ্ঞিতম্ ।
স নিশ্চয়েন য়োক্তব্যো য়োগোঽনির্বিণ্ণচেতসা ॥ ৬-২৩॥

সঙ্কল্পপ্রভবান্কামাংস্ত্যক্ত্বা সর্বানশেষতঃ ।
মনসৈবেন্দ্রিয়গ্রামং বিনিয়ম্য সমন্ততঃ ॥ ৬-২৪॥

শনৈঃ শনৈরুপরমেদ্ বুদ্ধ্যা ধৃতিগৃহীতয়া ।
আত্মসংস্থং মনঃ কৃত্বা ন কিঞ্চিদপি চিন্তয়েত্ ॥ ৬-২৫॥

য়তো য়তো নিশ্চরতি মনশ্চঞ্চলমস্থিরম্ ।
ততস্ততো নিয়ম্যৈতদাত্মন্যেব বশং নয়েত্ ॥ ৬-২৬॥

প্রশান্তমনসং হ্যেনং য়োগিনং সুখমুত্তমম্ ।
উপৈতি শান্তরজসং ব্রহ্মভূতমকল্মষম্ ॥ ৬-২৭॥

যুঞ্জন্নেবং সদাত্মানং য়োগী বিগতকল্মষঃ ।
সুখেন ব্রহ্মসংস্পর্শমত্যন্তং সুখমশ্নুতে ॥ ৬-২৮॥

সর্বভূতস্থমাত্মানং সর্বভূতানি চাত্মনি ।
ঈক্ষতে য়োগযুক্তাত্মা সর্বত্র সমদর্শনঃ ॥ ৬-২৯॥

য়ো মাং পশ্যতি সর্বত্র সর্বং চ ময়ি পশ্যতি ।
তস্যাহং ন প্রণশ্যামি স চ মে ন প্রণশ্যতি ॥ ৬-৩০॥

সর্বভূতস্থিতং য়ো মাং ভজত্যেকত্বমাস্থিতঃ ।
সর্বথা বর্তমানোঽপি স য়োগী ময়ি বর্ততে ॥ ৬-৩১॥

আত্মৌপম্যেন সর্বত্র সমং পশ্যতি য়োঽর্জুন ।

BACK TO TOP

সুখং বা য়দি বা দুঃখং স য়োগী পরমো মতঃ ॥ ৬-৩২॥

অর্জুন উবাচ ।

য়োঽয়ং য়োগস্ত্বয়া প্রোক্তঃ সাম্যেন মধুসূদন ।
এতস্যাহং ন পশ্যামি চঞ্চলত্বাত্স্থিতিং স্থিরাম্ ॥ ৬-৩৩॥

চঞ্চলং হি মনঃ কৃষ্ণ প্রমাথি বলবদ্ দৃঢম্ ।
তস্যাহং নিগ্রহং মন্যে বায়োরিব সুদুষ্করম্ ॥ ৬-৩৪॥

শ্রীভগবানুবাচ ।

অসংশয়ং মহাবাহো মনো দুর্নিগ্রহং চলম্ ।
অভ্যাসেন তু কৌন্তেয় বৈরাগ্যেণ চ গৃহ্যতে ॥ ৬-৩৫॥

অসংয়তাত্মনা য়োগো দুষ্প্রাপ ইতি মে মতিঃ ।
বশ্যাত্মনা তু য়ততা শক্যোঽবাপ্তুমুপায়তঃ ॥ ৬-৩৬॥

অর্জুন উবাচ ।

অয়তিঃ শ্রদ্ধয়োপেতো য়োগাচ্চলিতমানসঃ ।
অপ্রাপ্য য়োগসংসিদ্ধিং কাং গতিং কৃষ্ণ গচ্ছতি ॥ ৬-৩৭॥

কচ্চিন্নোভয়বিভ্রষ্টশ্ছিন্নাভ্রমিব নশ্যতি ।
অপ্রতিষ্ঠো মহাবাহো বিমূঢো ব্রহ্মণঃ পথি ॥ ৬-৩৮॥

এতন্মে সংশয়ং কৃষ্ণ ছেত্তুমর্হস্যশেষতঃ ।
ত্বদন্যঃ সংশয়স্যাস্য ছেত্তা ন হ্যুপপদ্যতে ॥ ৬-৩৯॥

শ্রীভগবানুবাচ ।

পার্থ নৈবেহ নামুত্র বিনাশস্তস্য বিদ্যতে ।
ন হি কল্যাণকৃত্কশ্চিদ্ দুর্গতিং তাত গচ্ছতি ॥ ৬-৪০॥

প্রাপ্য পুণ্যকৃতাং লোকানুষিত্বা শাশ্বতীঃ সমাঃ ।
শুচীনাং শ্রীমতাং গেহে য়োগভ্রষ্টোঽভিজায়তে ॥ ৬-৪১॥

অথবা য়োগিনামেব কুলে ভবতি ধীমতাম্ ।
এতদ্ধি দুর্লভতরং লোকে জন্ম য়দীদৃশম্ ॥ ৬-৪২॥

তত্র তং বুদ্ধিসংয়োগং লভতে পৌর্বদেহিকম্ ।
য়ততে চ ততো ভূয়ঃ সংসিদ্ধৌ কুরুনন্দন ॥ ৬-৪৩॥

পূর্বাভ্যাসেন তেনৈব হ্রিয়তে হ্যবশোঽপি সঃ ।
জিজ্ঞাসুরপি য়োগস্য শব্দব্রহ্মাতিবর্ততে ॥ ৬-৪৪॥

প্রয়ত্নাদ্যতমানস্তু য়োগী সংশুদ্ধকিল্বিষঃ ।

BACK TO TOP

অনেকজন্মসংসিদ্ধস্ততো য়াতি পরাং গতিম্ ॥ ৬-৪৫॥

তপস্বিভ্যোঽধিকো য়োগী জ্ঞানিভ্যোঽপি মতোঽধিকঃ ।
কর্মিভ্যশ্চাধিকো য়োগী তস্মাদ্যোগী ভবার্জুন ॥ ৬-৪৬॥

য়োগিনামপি সর্বেষাং মদ্গতেনান্তরাত্মনা ।
শ্রদ্ধাবান্ভজতে য়ো মাং স মে য়ুক্ততমো মতঃ ॥ ৬-৪৭॥

ওঁ তত্সদিতি শ্রীমদ্ভগবদ্গীতাসূপনিষত্সু
ব্রহ্মবিদ্যায়াং য়োগশাস্ত্রে শ্রীকৃষ্ণার্জুনসংবাদে
আত্মসংয়ময়োগো নাম ষষ্ঠোঽধ্যায়ঃ ॥ ৬॥

অথ সপ্তমোঽধ্যায়ঃ । জ্ঞানবিজ্ঞানয়োগঃ

শ্রীভগবানুবাচ ।

ময়্যাসক্তমনাঃ পার্থ য়োগং য়ুঞ্জন্মদাশ্রয়ঃ ।
অসংশয়ং সমগ্রং মাং য়থা জ্ঞাস্যসি তচ্ছৃণু ॥ ৭-১॥

জ্ঞানং তেঽহং সবিজ্ঞানমিদং বক্ষ্যাম্যশেষতঃ ।
য়জ্জ্ঞাত্বা নেহ ভূয়োঽন্যজ্জ্ঞাতব্যমবশিষ্যতে ॥ ৭-২॥

মনুষ্যাণাং সহস্রেষু কশ্চিদ্যততি সিদ্ধয়ে ।
য়ততামপি সিদ্ধানাং কশ্চিন্মাং বেত্তি তত্ত্বতঃ ॥ ৭-৩॥

ভূমিরাপোঽনলো বায়ুঃ খং মনো বুদ্ধিরেব চ ।
অহঙ্কার ইতীয়ং মে ভিন্না প্রকৃতিরষ্টধা ॥ ৭-৪॥

অপরেয়মিতস্ত্বন্যাং প্রকৃতিং বিদ্ধি মে পরাম্ ।
জীবভূতাং মহাবাহো য়য়েদং ধার্যতে জগত্ ॥ ৭-৫॥

এতদ্যোনীনি ভূতানি সর্বাণীত্যুপধারয় ।
অহং কৃত্স্নস্য জগতঃ প্রভবঃ প্রলয়স্তথা ॥ ৭-৬॥

মত্তঃ পরতরং নান্যত্কিঞ্চিদস্তি ধনঞ্জয় ।
ময়ি সর্বমিদং প্রোতং সূত্রে মণিগণা ইব ॥ ৭-৭॥

রসোঽহমপ্সু কৌন্তেয় প্রভাস্মি শশিসূর্যয়োঃ ।
প্রণবঃ সর্ববেদেষু শব্দঃ খে পৌরুষং নৃষু ॥ ৭-৮॥

পুণ্যো গন্ধঃ পৃথিব্যাং চ তেজশ্চাস্মি বিভাবসৌ ।
জীবনং সর্বভূতেষু তপশ্চাস্মি তপস্বিষু ॥ ৭-৯॥

বীজং মাং সর্বভূতানাং বিদ্ধি পার্থ সনাতনম্ ।
বুদ্ধির্বুদ্ধিমতামস্মি তেজস্তেজস্বিনামহম্ ॥ ৭-১০॥

বলং বলবতাং চাহং কামরাগবিবর্জিতম্ ।

BACK TO TOP

ধর্মাবিরুদ্ধো ভূতেষু কামোঽস্মি ভরতর্ষভ ॥ ৭-১১॥

যে চৈব সাত্ত্বিকা ভাবা রাজসাস্তামসাশ্চ যে ।
মত্ত এবেতি তান্বিদ্ধি ন ত্বহং তেষু তে ময়ি ॥ ৭-১২॥

ত্রিভির্গুণময়ৈর্ভাবৈরেভিঃ সর্বমিদং জগত্ ।
মোহিতং নাভিজানাতি মামেভ্যঃ পরমব্যয়ম্ ॥ ৭-১৩॥

দৈবী হ্যেষা গুণময়ী মম মায়া দুরত্যয়া ।
মামেব যে প্রপদ্যন্তে মায়ামেতাং তরন্তি তে ॥ ৭-১৪॥

ন মাং দুষ্কৃতিনো মূঢাঃ প্রপদ্যন্তে নরাধমাঃ ।
মায়য়াপহৃতজ্ঞানা আসুরং ভাবমাশ্রিতাঃ ॥ ৭-১৫॥

চতুর্বিধা ভজন্তে মাং জনাঃ সুকৃতিনোঽর্জুন ।
আর্তো জিজ্ঞাসুরর্থার্থী জ্ঞানী চ ভরতর্ষভ ॥ ৭-১৬॥

তেষাং জ্ঞানী নিত্যযুক্ত একভক্তির্বিশিষ্যতে ।
প্রিয়ো হি জ্ঞানিনোঽত্যর্থমহং স চ মম প্রিয়ঃ ॥ ৭-১৭॥

উদারাঃ সর্ব এবৈতে জ্ঞানী ত্বাত্মৈব মে মতম্ ।
আস্থিতঃ স হি যুক্তাত্মা মামেবানুত্তমাং গতিম্ ॥ ৭-১৮॥

বহূনাং জন্মনামন্তে জ্ঞানবান্মাং প্রপদ্যতে ।
বাসুদেবঃ সর্বমিতি স মহাত্মা সুদুর্লভঃ ॥ ৭-১৯॥

কামৈস্তৈস্তৈর্হৃতজ্ঞানাঃ প্রপদ্যন্তেঽন্যদেবতাঃ ।
তং তং নিয়মমাস্থায় প্রকৃত্যা নিয়তাঃ স্বয়া ॥ ৭-২০॥

যো যো যাং যাং তনুং ভক্তঃ শ্রদ্ধয়ার্চিতুমিচ্ছতি ।
তস্য তস্যাচলাং শ্রদ্ধাং তামেব বিদধাম্যহম্ ॥ ৭-২১॥

স তয়া শ্রদ্ধয়া যুক্তস্তস্যারাধনমীহতে ।
লভতে চ ততঃ কামান্ময়ৈব বিহিতান্হি তান্ ॥ ৭-২২॥

অন্তবত্তু ফলং তেষাং তদ্ভবত্যল্পমেধসাম্ ।
দেবান্দেবয়জো যান্তি মদ্ভক্তা যান্তি মামপি ॥ ৭-২৩॥

অব্যক্তং ব্যক্তিমাপন্নং মন্যন্তে মামবুদ্ধয়ঃ ।
পরং ভাবমজানন্তো মমাব্যয়মনুত্তমম্ ॥ ৭-২৪॥

নাহং প্রকাশঃ সর্বস্য যোগমায়াসমাবৃতঃ ।
মূঢোঽয়ং নাভিজানাতি লোকো মামজমব্যয়ম্ ॥ ৭-২৫॥

বেদাহং সমতীতানি বর্তমানানি চার্জুন ।
ভবিষ্যাণি চ ভূতানি মাং তু বেদ ন কশ্চন ॥ ৭-২৬॥

BACK TO TOP

ইচ্ছাদ্বেষসমুত্থেন দ্বন্দ্বমোহেন ভারত ।
সর্বভূতানি সম্মোহং সর্গে য়ান্তি পরন্তপ ॥ ৭-২৭॥

য়েষাং ত্বন্তগতং পাপং জনানাং পুণ্যকর্মণাম্ ।
তে দ্বন্দ্বমোহনির্মুক্তা ভজন্তে মাং দৃঢব্রতাঃ ॥ ৭-২৮॥

জরামরণমোক্ষায় মামাশ্রিত্য য়তন্তি য়ে ।
তে ব্রহ্ম তদ্বিদুঃ কৃত্স্নমধ্যাত্মং কর্ম চাখিলম্ ॥ ৭-২৯॥

সাধিভূতাধিদৈবং মাং সাধিয়জ্ঞং চ য়ে বিদুঃ ।
প্রয়াণকালেঽপি চ মাং তে বিদুর্য়ুক্তচেতসঃ ॥ ৭-৩০॥

ওঁ তত্সদিতি শ্রীমদ্ভগবদ্গীতাসূপনিষত্সু
ব্রহ্মবিদ্যায়াং য়োগশাস্ত্রে শ্রীকৃষ্ণার্জুনসংবাদে
জ্ঞানবিজ্ঞানয়োগো নাম সপ্তমোঽধ্যায়ঃ ॥ ৭॥

অথ অষ্টমোঽধ্যায়ঃ । অক্ষরব্রহ্ময়োগঃ

অর্জুন উবাচ ।

কিং তদ্ ব্রহ্ম কিমধ্যাত্মং কিং কর্ম পুরুষোত্তম ।
অধিভূতং চ কিং প্রোক্তমধিদৈবং কিমুচ্যতে ॥ ৮-১॥

অধিয়জ্ঞঃ কথং কোঽত্র দেহেঽস্মিন্মধুসূদন ।
প্রয়াণকালে চ কথং জ্ঞেয়োঽসি নিয়তাত্মভিঃ ॥ ৮-২॥

শ্রীভগবানুবাচ ।

অক্ষরং ব্রহ্ম পরমং স্বভাবোঽধ্যাত্মমুচ্যতে ।
ভূতভাবোদ্ভবকরো বিসর্গঃ কর্মসংজ্ঞিতঃ ॥ ৮-৩॥

অধিভূতং ক্ষরো ভাবঃ পুরুষশ্চাধিদৈবতম্ ।
অধিয়জ্ঞোঽহমেবাত্র দেহে দেহভৃতাং বর ॥ ৮-৪॥

অন্তকালে চ মামেব স্মরন্মুক্ত্বা কলেবরম্ ।
য়ঃ প্রয়াতি স মদ্ভাবং য়াতি নাস্ত্যত্র সংশয়ঃ ॥ ৮-৫॥

য়ং য়ং বাপি স্মরন্ভাবং ত্যজত্যন্তে কলেবরম্ ।
তং তমেবৈতি কৌন্তেয় সদা তদ্ভাবভাবিতঃ ॥ ৮-৬॥

তস্মাত্সর্বেষু কালেষু মামনুস্মর য়ুধ্য চ ।
ময়্যর্পিতমনোবুদ্ধির্মামেবৈষ্যস্যসংশয়ঃ ॥ ৮-৭॥ orসংশয়ম্

অভ্যাসয়োগয়ুক্তেন চেতসা নান্যগামিনা ।
পরমং পুরুষং দিব্যং য়াতি পার্থানুচিন্তয়ন্ ॥ ৮-৮॥

কবিং পুরাণমনুশাসিতার-

BACK TO TOP

মণোরণীয়ংসমনুস্মরেদ্যঃ ।
সর্বস্য ধাতারমচিন্ত্যরূপ-
মাদিত্যবর্ণং তমসঃ পরস্তাত্ ॥ ৮-৯॥

প্রয়াণকালে মনসাঽচলেন
ভক্ত্যা যুক্তো য়োগবলেন চৈব ।
ভ্রুবোর্মধ্যে প্রাণমাবেশ্য সম্যক্
স তং পরং পুরুষমুপৈতি দিব্যম্ ॥ ৮-১০॥

য়দক্ষরং বেদবিদো বদন্তি
বিশন্তি য়দ্যতয়ো বীতরাগাঃ ।
য়দিচ্ছন্তো ব্রহ্মচর্যং চরন্তি
তত্তে পদং সঙ্গ্রহেণ প্রবক্ষ্যে ॥ ৮-১১॥

সর্বদ্বারাণি সংয়ম্য মনো হৃদি নিরুধ্য চ ।
মূর্ধ্ন্যাধায়াত্মনঃ প্রাণমাস্থিতো য়োগধারণাম্ ॥ ৮-১২॥

ওমিত্যেকাক্ষরং ব্রহ্ম ব্যাহরন্মামনুস্মরন্ ।
য়ঃ প্রয়াতি ত্যজন্দেহং স য়াতি পরমাং গতিম্ ॥ ৮-১৩॥

অনন্যচেতাঃ সততং য়ো মাং স্মরতি নিত্যশঃ ।
তস্যাহং সুলভঃ পার্থ নিত্যয়ুক্তস্য য়োগিনঃ ॥ ৮-১৪॥

মামুপেত্য পুনর্জন্ম দুঃখালয়মশাশ্বতম্ ।
নাপ্নুবন্তি মহাত্মানঃ সংসিদ্ধিং পরমাং গতাঃ ॥ ৮-১৫॥

আব্রহ্মভুবনাল্লোকাঃ পুনরাবর্তিনোঽর্জুন ।
মামুপেত্য তু কৌন্তেয় পুনর্জন্ম ন বিদ্যতে ॥ ৮-১৬॥

সহস্রয়ুগপর্যন্তমহর্যদ্ ব্রহ্মণো বিদুঃ ।
রাত্রিং য়ুগসহস্রান্তাং তেঽহোরাত্রবিদো জনাঃ ॥ ৮-১৭॥

অব্যক্তাদ্ ব্যক্তয়ঃ সর্বাঃ প্রভবন্ত্যহরাগমে ।
রাত্র্যাগমে প্রলীয়ন্তে তত্রৈবাব্যক্তসংজ্ঞকে ॥ ৮-১৮॥

ভূতগ্রামঃ স এবায়ং ভূত্বা ভূত্বা প্রলীয়তে ।
রাত্র্যাগমেঽবশঃ পার্থ প্রভবত্যহরাগমে ॥ ৮-১৯॥

পরস্তস্মাত্তু ভাবোঽন্যোঽব্যক্তোঽব্যক্তাত্সনাতনঃ ।
য়ঃ স সর্বেষু ভূতেষু নশ্যত্সু ন বিনশ্যতি ॥ ৮-২০॥

অব্যক্তোঽক্ষর ইত্যুক্তস্তমাহুঃ পরমাং গতিম্ ।
য়ং প্রাপ্য ন নিবর্তন্তে তদ্ধাম পরমং মম ॥ ৮-২১॥

পুরুষঃ স পরঃ পার্থ ভক্ত্যা লভ্যস্ত্বনন্যয়া ।
য়স্যান্তঃস্থানি ভূতানি য়েন সর্বমিদং ততম্ ॥ ৮-২২॥

BACK TO TOP

যত্র কালে ত্বনাবৃত্তিমাবৃত্তিং চৈব যোগিনঃ ।
প্রয়াতা যান্তি তং কালং বক্ষ্যামি ভরতর্ষভ ॥ ৮-২৩॥

অগ্নির্জ্যোতিরহঃ শুক্লঃ ষণ্মাসা উত্তরায়ণম্ ।
তত্র প্রয়াতা গচ্ছন্তি ব্রহ্ম ব্রহ্মবিদো জনাঃ ॥ ৮-২৪॥

ধূমো রাত্রিস্তথা কৃষ্ণঃ ষণ্মাসা দক্ষিণায়নম্ ।
তত্র চান্দ্রমসং জ্যোতির্যোগী প্রাপ্য নিবর্ততে ॥ ৮-২৫॥

শুক্লকৃষ্ণে গতী হ্যেতে জগতঃ শাশ্বতে মতে ।
একয়া যাত্যনাবৃত্তিমন্যয়াবর্ততে পুনঃ ॥ ৮-২৬॥

নৈতে সৃতী পার্থ জানন্যোগী মুহ্যতি কশ্চন ।
তস্মাত্সর্বেষু কালেষু যোগযুক্তো ভবার্জুন ॥ ৮-২৭॥

বেদেষু যজ্ঞেষু তপঃসু চৈব
দানেষু যত্পুণ্যফলং প্রদিষ্টম্ ।
অত্যেতি তত্সর্বমিদং বিদিত্বা
যোগী পরং স্থানমুপৈতি চাদ্যম্ ॥ ৮-২৮॥

ওঁ তত্সদিতি শ্রীমদ্ভগবদ্গীতাসূপনিষত্সু
ব্রহ্মবিদ্যায়াং যোগশাস্ত্রে শ্রীকৃষ্ণার্জুনসংবাদে
অক্ষরব্রহ্মযোগো নামাষ্টমোঽধ্যায়ঃ ॥ ৮॥

অথ নবমোঽধ্যায়ঃ । রাজবিদ্যারাজগুহ্যযোগঃ

শ্রীভগবানুবাচ ।

ইদং তু তে গুহ্যতমং প্রবক্ষ্যাম্যনসূয়বে ।
জ্ঞানং বিজ্ঞানসহিতং যজ্জ্ঞাত্বা মোক্ষ্যসেঽশুভাত্ ॥ ৯-১॥

রাজবিদ্যা রাজগুহ্যং পবিত্রমিদমুত্তমম্ ।
প্রত্যক্ষাবগমং ধর্ম্যং সুসুখং কর্তুমব্যয়ম্ ॥ ৯-২॥

অশ্রদ্দধানাঃ পুরুষা ধর্মস্যাস্য পরন্তপ ।
অপ্রাপ্য মাং নিবর্তন্তে মৃত্যুসংসারবর্ত্মনি ॥ ৯-৩॥

ময়া ততমিদং সর্বং জগদব্যক্তমূর্তিনা ।
মত্স্থানি সর্বভূতানি ন চাহং তেষ্ববস্থিতঃ ॥ ৯-৪॥

ন চ মত্স্থানি ভূতানি পশ্য মে যোগমৈশ্বরম্ ।
ভূতভৃন্ন চ ভূতস্থো মমাত্মা ভূতভাবনঃ ॥ ৯-৫॥

যথাকাশস্থিতো নিত্যং বায়ুঃ সর্বত্রগো মহান্ ।
তথা সর্বাণি ভূতানি মত্স্থানীত্যুপধারয় ॥ ৯-৬॥

BACK TO TOP

সর্বভূতানি কৌন্তেয় প্রকৃতিং য়ান্তি মামিকাম্ ।
কল্পক্ষয়ে পুনস্তানি কল্পাদৌ বিসৃজাম্যহম্ ॥ ৯-৭॥

প্রকৃতিং স্বামবষ্টভ্য বিসৃজামি পুনঃ পুনঃ ।
ভূতগ্রামমিমং কৃত্স্নমবশং প্রকৃতের্বশাত্ ॥ ৯-৮॥

ন চ মাং তানি কর্মাণি নিবধ্নন্তি ধনঞ্জয় ।
উদাসীনবদাসীনমসক্তং তেষু কর্মসু ॥ ৯-৯॥

ময়াধ্যক্ষেণ প্রকৃতিঃ সূয়তে সচরাচরম্ ।
হেতুনানেন কৌন্তেয় জগদ্বিপরিবর্ততে ॥ ৯-১০॥

অবজানন্তি মাং মূঢা মানুষীং তনুমাশ্রিতম্ ।
পরং ভাবমজানন্তো মম ভূতমহেশ্বরম্ ॥ ৯-১১॥

মোঘাশা মোঘকর্মাণো মোঘজ্ঞানা বিচেতসঃ ।
রাক্ষসীমাসুরীং চৈব প্রকৃতিং মোহিনীং শ্রিতাঃ ॥ ৯-১২॥

মহাত্মানস্তু মাং পার্থ দৈবীং প্রকৃতিমাশ্রিতাঃ ।
ভজন্ত্যনন্যমনসো জ্ঞাত্বা ভূতাদিমব্যয়ম্ ॥ ৯-১৩॥

সততং কীর্তয়ন্তো মাং য়তন্তশ্চ দৃঢব্রতাঃ ।
নমস্যন্তশ্চ মাং ভক্ত্যা নিত্যয়ুক্তা উপাসতে ॥ ৯-১৪॥

জ্ঞানয়জ্ঞেন চাপ্যন্যে য়জন্তো মামুপাসতে ।
একত্বেন পৃথক্ত্বেন বহুধা বিশ্বতোমুখম্ ॥ ৯-১৫॥

অহং ক্রতুরহং য়জ্ঞঃ স্বধাহমহমৌষধম্ ।
মন্ত্রোঽহমহমেবাজ্যমহমগ্নিরহং হুতম্ ॥ ৯-১৬॥

পিতাহমস্য জগতো মাতা ধাতা পিতামহঃ ।
বেদ্যং পবিত্রমোঙ্কার ঋক্সাম য়জুরেব চ ॥ ৯-১৭॥

গতির্ভর্তা প্রভুঃ সাক্ষী নিবাসঃ শরণং সুহৃত্ ।
প্রভবঃ প্রলয়ঃ স্থানং নিধানং বীজমব্যয়ম্ ॥ ৯-১৮॥

তপাম্যহমহং বর্ষং নিগৃহ্ণাম্যুত্সৃজামি চ ।
অমৃতং চৈব মৃত্যুশ্চ সদসচ্চাহমর্জুন ॥ ৯-১৯॥

ত্রৈবিদ্যা মাং সোমপাঃ পূতপাপা
য়জ্ঞৈরিষ্ট্বা স্বর্গতিং প্রার্থয়ন্তে ।
তে পুণ্যমাসাদ্য সুরেন্দ্রলোক-
মশ্নন্তি দিব্যান্দিবি দেবভোগান্ ॥ ৯-২০॥

তে তং ভুক্ত্বা স্বর্গলোকং বিশালং
ক্ষীণে পুণ্যে মর্ত্যলোকং বিশন্তি ।
এবং ত্রয়ীধর্মমনুপ্রপন্না

BACK TO TOP

গতাগতং কামকামা লভন্তে ॥ ৯-২১॥

অনন্যাশ্চিন্তয়ন্তো মাং য়ে জনাঃ পর্যুপাসতে ।
তেষাং নিত্যাভিয়ুক্তানাং য়োগক্ষেমং বহাম্যহম্ ॥ ৯-২২॥

য়েঽপ্যন্যদেবতা ভক্তা য়জন্তে শ্রদ্ধয়ান্বিতাঃ ।
তেঽপি মামেব কৌন্তেয় য়জন্ত্যবিধিপূর্বকম্ ॥ ৯-২৩॥

অহং হি সর্বয়জ্ঞানাং ভোক্তা চ প্রভুরেব চ ।
ন তু মামভিজানন্তি তত্ত্বেনাতশ্চ্যবন্তি তে ॥ ৯-২৪॥

য়ান্তি দেবব্রতা দেবান্পিতৄন্যান্তি পিতৃব্রতাঃ ।
ভূতানি য়ান্তি ভূতেজ্যা য়ান্তি মদ্যাজিনোঽপি মাম্ ॥ ৯-২৫॥

পত্রং পুষ্পং ফলং তোয়ং য়ো মে ভক্ত্যা প্রয়চ্ছতি ।
তদহং ভক্ত্যুপহৃতমশ্নামি প্রয়তাত্মনঃ ॥ ৯-২৬॥

য়ত্করোষি য়দশ্নাসি য়জ্জুহোষি দদাসি য়ত্ ।
য়ত্তপস্যসি কৌন্তেয় তত্কুরুষ্ব মদর্পণম্ ॥ ৯-২৭॥

শুভাশুভফলৈরেবং মোক্ষ্যসে কর্মবন্ধনৈঃ ।
সংন্যাসয়োগয়ুক্তাত্মা বিমুক্তো মামুপৈষ্যসি ॥ ৯-২৮॥

সমোঽহং সর্বভূতেষু ন মে দ্বেষ্যোঽস্তি ন প্রিয়ঃ ।
য়ে ভজন্তি তু মাং ভক্ত্যা ময়ি তে তেষু চাপ্যহম্ ॥ ৯-২৯॥

অপি চেত্সুদুরাচারো ভজতে মামনন্যভাক্ ।
সাধুরেব স মন্তব্যঃ সম্যগ্ব্যবসিতো হি সঃ ॥ ৯-৩০॥

ক্ষিপ্রং ভবতি ধর্মাত্মা শশ্বচ্ছান্তিং নিগচ্ছতি ।
কৌন্তেয় প্রতিজানীহি ন মে ভক্তঃ প্রণশ্যতি ॥ ৯-৩১॥

মাং হি পার্থ ব্যপাশ্রিত্য য়েঽপি স্যুঃ পাপয়োনয়ঃ ।
স্ত্রিয়ো বৈশ্যাস্তথা শূদ্রাস্তেঽপি য়ান্তি পরাং গতিম্ ॥ ৯-৩২॥

কিং পুনর্ব্রাহ্মণাঃ পুণ্যা ভক্তা রাজর্ষয়স্তথা ।
অনিত্যমসুখং লোকমিমং প্রাপ্য ভজস্ব মাম্ ॥ ৯-৩৩॥

মন্মনা ভব মদ্ভক্তো মদ্যাজী মাং নমস্কুরু ।
মামেবৈষ্যসি য়ুক্ত্বৈবমাত্মানং মত্পরায়ণঃ ॥ ৯-৩৪॥

ওঁ তত্সদিতি শ্রীমদ্ভগবদ্গীতাসূপনিষত্সু
ব্রহ্মবিদ্যায়াং য়োগশাস্ত্রে শ্রীকৃষ্ণার্জুনসংবাদে
রাজবিদ্যারাজগুহ্যয়োগো নাম নবমোঽধ্যায়ঃ ॥ ৯॥

অথ দশমোঽধ্যায়ঃ । বিভূতিয়োগঃ

BACK TO TOP

শ্রীভগবানুবাচ ।

ভূয় এব মহাবাহো শৃণু মে পরমং বচঃ ।
যত্তেঽহং প্রীয়মাণায় বক্ষ্যামি হিতকাম্যয়া ॥ ১০-১॥

ন মে বিদুঃ সুরগণাঃ প্রভবং ন মহর্ষয়ঃ ।
অহমাদির্হি দেবানাং মহর্ষীণাং চ সর্বশঃ ॥ ১০-২॥

যো মামজমনাদিং চ বেত্তি লোকমহেশ্বরম্ ।
অসম্মূঢঃ স মর্ত্যেষু সর্বপাপৈঃ প্রমুচ্যতে ॥ ১০-৩॥

বুদ্ধির্জ্ঞানমসম্মোহঃ ক্ষমা সত্যং দমঃ শমঃ ।
সুখং দুঃখং ভবোঽভাবো ভয়ং চাভয়মেব চ ॥ ১০-৪॥

অহিংসা সমতা তুষ্টিস্তপো দানং যশোঽযশঃ ।
ভবন্তি ভাবা ভূতানাং মত্ত এব পৃথগ্বিধাঃ ॥ ১০-৫॥

মহর্ষয়ঃ সপ্ত পূর্বে চত্বারো মনবস্তথা ।
মদ্ভাবা মানসা জাতা যেষাং লোক ইমাঃ প্রজাঃ ॥ ১০-৬॥

এতাং বিভূতিং যোগং চ মম যো বেত্তি তত্ত্বতঃ ।
সোঽবিকম্পেন যোগেন যুজ্যতে নাত্র সংশয়ঃ ॥ ১০-৭॥

অহং সর্বস্য প্রভবো মত্তঃ সর্বং প্রবর্ততে ।
ইতি মত্বা ভজন্তে মাং বুধা ভাবসমন্বিতাঃ ॥ ১০-৮॥

মচ্চিত্তা মদ্গতপ্রাণা বোধয়ন্তঃ পরস্পরম্ ।
কথয়ন্তশ্চ মাং নিত্যং তুষ্যন্তি চ রমন্তি চ ॥ ১০-৯॥

তেষাং সততযুক্তানাং ভজতাং প্রীতিপূর্বকম্ ।
দদামি বুদ্ধিযোগং তং যেন মামুপয়ান্তি তে ॥ ১০-১০॥

তেষামেবানুকম্পার্থমহমজ্ঞানজং তমঃ ।
নাশয়াম্যাত্মভাবস্থো জ্ঞানদীপেন ভাস্বতা ॥ ১০-১১॥

অর্জুন উবাচ ।

পরং ব্রহ্ম পরং ধাম পবিত্রং পরমং ভবান্ ।
পুরুষং শাশ্বতং দিব্যমাদিদেবমজং বিভুম্ ॥ ১০-১২॥

আহুস্ত্বামৃষয়ঃ সর্বে দেবর্ষির্নারদস্তথা ।
অসিতো দেবলো ব্যাসঃ স্বয়ং চৈব ব্রবীষি মে ॥ ১০-১৩॥

সর্বমেতদৃতং মন্যে যন্মাং বদসি কেশব ।
ন হি তে ভগবন্ব্যক্তিং বিদুর্দেবা ন দানবাঃ ॥ ১০-১৪॥

স্বয়মেবাত্মনাত্মানং বেত্থ ত্বং পুরুষোত্তম ।

BACK TO TOP

ভূতভাবন ভূতেশ দেবদেব জগত্পতে ॥ ১০-১৫॥

বক্তুমর্হস্যশেষেণ দিব্যা হ্যাত্মবিভূতয়ঃ ।
য়াভির্বিভূতিভির্লোকানিমাংস্ত্বং ব্যাপ্য তিষ্ঠসি ॥ ১০-১৬॥

কথং বিদ্যামহং য়োগিংস্ত্বাং সদা পরিচিন্তয়ন্ ।
কেষু কেষু চ ভাবেষু চিন্ত্যোঽসি ভগবন্ময়া ॥ ১০-১৭॥

বিস্তরেণাত্মনো য়োগং বিভূতিং চ জনার্দন ।
ভূয়ঃ কথয় তৃপ্তির্হি শৃণ্বতো নাস্তি মেঽমৃতম্ ॥ ১০-১৮॥

শ্রীভগবানুবাচ ।

হন্ত তে কথয়িষ্যামি দিব্যা হ্যাত্মবিভূতয়ঃ ।
প্রাধান্যতঃ কুরুশ্রেষ্ঠ নাস্ত্যন্তো বিস্তরস্য মে ॥ ১০-১৯॥

অহমাত্মা গুডাকেশ সর্বভূতাশয়স্থিতঃ ।
অহমাদিশ্চ মধ্যং চ ভূতানামন্ত এব চ ॥ ১০-২০॥

আদিত্যানামহং বিষ্ণুর্জ্যোতিষাং রবিরংশুমান্ ।
মরীচির্মরুতামস্মি নক্ষত্রাণামহং শশী ॥ ১০-২১॥

বেদানাং সামবেদোঽস্মি দেবানামস্মি বাসবঃ ।
ইন্দ্রিয়াণাং মনশ্চাস্মি ভূতানামস্মি চেতনা ॥ ১০-২২॥

রুদ্রাণাং শঙ্করশ্চাস্মি বিত্তেশো য়ক্ষরক্ষসাম্ ।
বসূনাং পাবকশ্চাস্মি মেরুঃ শিখরিণামহম্ ॥ ১০-২৩॥

পুরোধসাং চ মুখ্যং মাং বিদ্ধি পার্থ বৃহস্পতিম্ ।
সেনানীনামহং স্কন্দঃ সরসামস্মি সাগরঃ ॥ ১০-২৪॥

মহর্ষীণাং ভৃগুরহং গিরামস্ম্যেকমক্ষরম্ ।
য়জ্ঞানাং জপয়জ্ঞোঽস্মি স্থাবরাণাং হিমালয়ঃ ॥ ১০-২৫॥

অশ্বত্থঃ সর্ববৃক্ষাণাং দেবর্ষীণাং চ নারদঃ ।
গন্ধর্বাণাং চিত্ররথঃ সিদ্ধানাং কপিলো মুনিঃ ॥ ১০-২৬॥

উচ্চৈঃশ্রবসমশ্বানাং বিদ্ধি মামমৃতোদ্ভবম্ ।
ঐরাবতং গজেন্দ্রাণাং নরাণাং চ নরাধিপম্ ॥ ১০-২৭॥

আয়ুধানামহং বজ্রং ধেনূনামস্মি কামধুক্ ।
প্রজনশ্চাস্মি কন্দর্পঃ সর্পাণামস্মি বাসুকিঃ ॥ ১০-২৮॥

অনন্তশ্চাস্মি নাগানাং বরুণো য়াদসামহম্ ।
পিতৄণামর্যমা চাস্মি য়মঃ সংয়মতামহম্ ॥ ১০-২৯॥

প্রহ্লাদশ্চাস্মি দৈত্যানাং কালঃ কলয়তামহম্ ।

BACK TO TOP

মৃগাণাং চ মৃগেন্দ্রোঽহং বৈনতেয়শ্চ পক্ষিণাম্ ॥ ১০-৩০॥

পবনঃ পবতামস্মি রামঃ শস্ত্রভৃতামহম্ ।
ঝষাণাং মকরশ্চাস্মি স্রোতসামস্মি জাহ্নবী ॥ ১০-৩১॥

সর্গাণামাদিরন্তশ্চ মধ্যং চৈবাহমর্জুন ।
অধ্যাত্মবিদ্যা বিদ্যানাং বাদঃ প্রবদতামহম্ ॥ ১০-৩২॥

অক্ষরাণামকারোঽস্মি দ্বন্দ্বঃ সামাসিকস্য চ ।
অহমেবাক্ষয়ঃ কালো ধাতাহং বিশ্বতোমুখঃ ॥ ১০-৩৩॥

মৃত্যুঃ সর্বহরশ্চাহমুদ্ভবশ্চ ভবিষ্যতাম্ ।
কীর্তিঃ শ্রীর্বাক্চ নারীণাং স্মৃতির্মেধা ধৃতিঃ ক্ষমা ॥ ১০-৩৪॥

বৃহত্সাম তথা সাম্নাং গায়ত্রী ছন্দসামহম্ ।
মাসানাং মার্গশীর্ষোঽহমৃতূনাং কুসুমাকরঃ ॥ ১০-৩৫॥

দ্যূতং ছলয়তামস্মি তেজস্তেজস্বিনামহম্ ।
জয়োঽস্মি ব্যবসায়োঽস্মি সত্ত্বং সত্ত্ববতামহম্ ॥ ১০-৩৬॥

বৃষ্ণীনাং বাসুদেবোঽস্মি পাণ্ডবানাং ধনঞ্জয়ঃ ।
মুনীনামপ্যহং ব্যাসঃ কবীনামুশনা কবিঃ ॥ ১০-৩৭॥

দণ্ডো দময়তামস্মি নীতিরস্মি জিগীষতাম্ ।
মৌনং চৈবাস্মি গুহ্যানাং জ্ঞানং জ্ঞানবতামহম্ ॥ ১০-৩৮॥

য়চ্চাপি সর্বভূতানাং বীজং তদহমর্জুন ।
ন তদস্তি বিনা য়ত্স্যান্ময়া ভূতং চরাচরম্ ॥ ১০-৩৯॥

নান্তোঽস্তি মম দিব্যানাং বিভূতীনাং পরন্তপ ।
এষ তূদ্দেশতঃ প্রোক্তো বিভূতের্বিস্তরো ময়া ॥ ১০-৪০॥

য়দ্যদ্বিভূতিমত্সত্ত্বং শ্রীমদূর্জিতমেব বা ।
তত্তদেবাবগচ্ছ ত্বং মম তেজোংঽশসম্ভবম্ ॥ ১০-৪১॥

অথবা বহুনৈতেন কিং জ্ঞাতেন তবার্জুন ।
বিষ্টভ্যাহমিদং কৃত্স্নমেকাংশেন স্থিতো জগত্ ॥ ১০-৪২॥

ওঁ তত্সদিতি শ্রীমদ্ভগবদ্গীতাসূপনিষত্সু
ব্রহ্মবিদ্যায়াং য়োগশাস্ত্রে শ্রীকৃষ্ণার্জুনসংবাদে
বিভূতিয়োগো নাম দশমোঽধ্যায়ঃ ॥ ১০॥

অথৈকাদশোঽধ্যায়ঃ । বিশ্বরূপদর্শনয়োগঃ

অর্জুন উবাচ ।

মদনুগ্রহায় পরমং গুহ্যমধ্যাত্মসংজ্ঞিতম্ ।

BACK TO TOP

যত্ত্বয়োক্তং বচস্তেন মোহোঽয়ং বিগতো মম ॥ ১১-১॥

ভবাপ্যয়ৌ হি ভূতানাং শ্রুতৌ বিস্তরশো ময়া ।
ত্বত্তঃ কমলপত্রাক্ষ মাহাত্ম্যমপি চাব্যয়ম্ ॥ ১১-২॥

এবমেতদ্যথাত্থ ত্বমাত্মানং পরমেশ্বর ।
দ্রষ্টুমিচ্ছামি তে রূপমৈশ্বরং পুরুষোত্তম ॥ ১১-৩॥

মন্যসে যদি তচ্ছক্যং ময়া দ্রষ্টুমিতি প্রভো ।
যোগেশ্বর ততো মে ত্বং দর্শয়াত্মানমব্যয়ম্ ॥ ১১-৪॥

শ্রীভগবানুবাচ ।

পশ্য মে পার্থ রূপাণি শতশোঽথ সহস্রশঃ ।
নানাবিধানি দিব্যানি নানাবর্ণাকৃতীনি চ ॥ ১১-৫॥

পশ্যাদিত্যান্বসূন্রুদ্রানশ্বিনৌ মরুতস্তথা ।
বহূন্যদৃষ্টপূর্বাণি পশ্যাশ্চর্যাণি ভারত ॥ ১১-৬॥

ইহৈকস্থং জগত্কৃত্স্নং পশ্যাদ্য সচরাচরম্ ।
মম দেহে গুডাকেশ যচ্চান্যদ্ দ্রষ্টুমিচ্ছসি ॥ ১১-৭॥

ন তু মাং শক্যসে দ্রষ্টুমনেনৈব স্বচক্ষুষা ।
দিব্যং দদামি তে চক্ষুঃ পশ্য মে য়োগমৈশ্বরম্ ॥ ১১-৮॥

সঞ্জয় উবাচ ।

এবমুক্ত্বা ততো রাজন্মহায়োগেশ্বরো হরিঃ ।
দর্শয়ামাস পার্থায় পরমং রূপমৈশ্বরম্ ॥ ১১-৯॥

অনেকবক্ত্রনয়নমনেকাদ্ভুতদর্শনম্ ।
অনেকদিব্যাভরণং দিব্যানেকোদ্যতায়ুধম্ ॥ ১১-১০॥

দিব্যমাল্যাম্বরধরং দিব্যগন্ধানুলেপনম্ ।
সর্বাশ্চর্যময়ং দেবমনন্তং বিশ্বতোমুখম্ ॥ ১১-১১॥

দিবি সূর্যসহস্রস্য ভবেদ্যুগপদুত্থিতা ।
যদি ভাঃ সদৃশী সা স্যাদ্ভাসস্তস্য মহাত্মনঃ ॥ ১১-১২॥

তত্রৈকস্থং জগত্কৃত্স্নং প্রবিভক্তমনেকধা ।
অপশ্যদ্দেবদেবস্য শরীরে পাণ্ডবস্তদা ॥ ১১-১৩॥

ততঃ স বিস্ময়াবিষ্টো হৃষ্টরোমা ধনঞ্জয়ঃ ।
প্রণম্য শিরসা দেবং কৃতাঞ্জলিরভাষত ॥ ১১-১৪॥

অর্জুন উবাচ ।

BACK TO TOP

পশ্যামি দেবাংস্তব দেব দেহে
সর্বাংস্তথা ভূতবিশেষসঙ্ঘান্ ।
ব্রহ্মাণমীশং কমলাসনস্থ-
মৃষীংশ্চ সর্বানুরগাংশ্চ দিব্যান্ ॥ ১১-১৫॥

অনেকবাহূদরবক্ত্রনেত্রং
পশ্যামি ত্বাং সর্বতোঽনন্তরূপম্ ।
নান্তং ন মধ্যং ন পুনস্তবাদিং
পশ্যামি বিশ্বেশ্বর  বিশ্বরূপ ॥ ১১-১৬॥

কিরীটিনং গদিনং চক্রিণং চ
তেজোরাশিং সর্বতো দীপ্তিমন্তম্ ।
পশ্যামি ত্বাং দুর্নিরীক্ষ্যং সমন্তাদ্
দীপ্তানলার্কদ্যুতিমপ্রমেয়ম্ ॥ ১১-১৭॥

ত্বমক্ষরং পরমং বেদিতব্যং
ত্বমস্য বিশ্বস্য পরং নিধানম্ ।
ত্বমব্যয়ঃ শাশ্বতধর্মগোপ্তা
সনাতনস্ত্বং পুরুষো মতো মে ॥ ১১-১৮॥

অনাদিমধ্যান্তমনন্তবীর্য-
মনন্তবাহুং শশিসূর্যনেত্রম্ ।
পশ্যামি ত্বাং দীপ্তহুতাশবক্ত্রং
স্বতেজসা বিশ্বমিদং তপন্তম্ ॥ ১১-১৯॥

দ্যাবাপৃথিব্যোরিদমন্তরং হি
ব্যাপ্তং ত্বয়ৈকেন দিশশ্চ সর্বাঃ ।
দৃষ্ট্বাদ্ভুতং রূপমুগ্রং তবেদং
লোকত্রয়ং প্রব্যথিতং মহাত্মন্ ॥ ১১-২০॥

অমী হি ত্বাং সুরসঙ্ঘা বিশন্তি
কেচিদ্ভীতাঃ প্রাঞ্জলয়ো গৃণন্তি ।
স্বস্তীত্যুক্ত্বা মহর্ষিসিদ্ধসঙ্ঘাঃ
স্তুবন্তি ত্বাং স্তুতিভিঃ পুষ্কলাভিঃ ॥ ১১-২১॥

রুদ্রাদিত্যা বসবো য়ে চ সাধ্যা
বিশ্বেঽশ্বিনৌ মরুতশ্চোষ্মপাশ্চ ।
গন্ধর্বয়ক্ষাসুরসিদ্ধসঙ্ঘা
বীক্ষন্তে ত্বাং বিস্মিতাশ্চৈব সর্বে ॥ ১১-২২॥

রূপং মহত্তে বহুবক্ত্রনেত্রং
মহাবাহো বহুবাহূরুপাদম্ ।
বহূদরং বহুদংষ্ট্রাকরালং
দৃষ্ট্বা লোকাঃ প্রব্যথিতাস্তথাহম্ ॥ ১১-২৩॥

নভঃস্পৃশং দীপ্তমনেকবর্ণং
ব্যাত্তাননং দীপ্তবিশালনেত্রম্ ।

BACK TO TOP

দৃষ্ট্বা হি ত্বাং প্রব্যথিতান্তরাত্মা
ধৃতিং ন বিন্দামি শমং চ বিষ্ণো ॥ ১১-২৪॥

দংষ্ট্রাকরালানি চ তে মুখানি
দৃষ্ট্বৈব কালানলসন্নিভানি ।
দিশো ন জানে ন লভে চ শর্ম
প্রসীদ দেবেশ জগন্নিবাস ॥ ১১-২৫॥

অমী চ ত্বাং ধৃতরাষ্ট্রস্য পুত্রাঃ
সর্বে সহৈবাবনিপালসঙ্ঘৈঃ ।
ভীষ্মো দ্রোণঃ সূতপুত্রস্তথাসৌ
সহাস্মদীয়ৈরপি য়োধমুখ্যৈঃ ॥ ১১-২৬॥

বক্ত্রাণি তে ত্বরমাণা বিশন্তি
দংষ্ট্রাকরালানি ভয়ানকানি ।
কেচিদ্বিলগ্না দশনান্তরেষু
সন্দৃশ্যন্তে চূর্ণিতৈরুত্তমাঙ্গৈঃ ॥ ১১-২৭॥

য়থা নদীনাং বহবোঽম্বুবেগাঃ
সমুদ্রমেবাভিমুখা দ্রবন্তি ।
তথা তবামী নরলোকবীরা
বিশন্তি বক্ত্রাণ্যভিবিজ্বলন্তি ॥ ১১-২৮॥

য়থা প্রদীপ্তং জ্বলনং পতঙ্গা
বিশন্তি নাশায় সমৃদ্ধবেগাঃ ।
তথৈব নাশায় বিশন্তি লোকাস্-
তবাপি বক্ত্রাণি সমৃদ্ধবেগাঃ ॥ ১১-২৯॥

লেলিহ্যসে গ্রসমানঃ সমন্তাল্-
লোকান্সমগ্রান্বদনৈর্জ্বলদ্ভিঃ ।
তেজোভিরাপূর্য জগত্সমগ্রং
ভাসস্তবোগ্রাঃ প্রতপন্তি বিষ্ণো ॥ ১১-৩০॥

আখ্যাহি মে কো ভবানুগ্ররূপো
নমোঽস্তু তে দেববর প্রসীদ ।
বিজ্ঞাতুমিচ্ছামি ভবন্তমাদ্যং
ন হি প্রজানামি তব প্রবৃত্তিম্ ॥ ১১-৩১॥

শ্রীভগবানুবাচ ।

কালোঽস্মি লোকক্ষয়কৃত্প্রবৃদ্ধো
লোকান্সমাহর্তুমিহ প্রবৃত্তঃ ।
ঋতেঽপি ত্বাং ন ভবিষ্যন্তি সর্বে
য়েঽবস্থিতাঃ প্রত্যনীকেষু য়োধাঃ ॥ ১১-৩২॥

তস্মাত্ত্বমুত্তিষ্ঠ য়শো লভস্ব

BACK TO TOP

জিত্বা শত্রূন্ ভুঙ্‍ক্ষ্ব রাজ্যং সমৃদ্ধম্ ।
মযৈবৈতে নিহতাঃ পূর্বমেব
নিমিত্তমাত্রং ভব সব্যসাচিন্ ॥ ১১-৩৩॥

দ্রোণং চ ভীষ্মং চ জয়দ্রথং চ
কর্ণং তথান্যানপি যোধবীরান্ ।
ময়া হতাংস্ত্বং জহি মা ব্যথিষ্ঠা
যুধ্যস্ব জেতাসি রণে সপত্নান্ ॥ ১১-৩৪॥

সঞ্জয় উবাচ ।

এতচ্ছ্রুত্বা বচনং কেশবস্য
কৃতাঞ্জলির্বেপমানঃ কিরীটী ।
নমস্কৃত্বা ভূয় এবাহ কৃষ্ণং
সগদ্গদং ভীতভীতঃ প্রণম্য ॥ ১১-৩৫॥

অর্জুন উবাচ ।

স্থানে হৃষীকেশ তব প্রকীর্ত্যা
জগত্প্রহৃষ্যত্যনুরজ্যতে চ ।
রক্ষাংসি ভীতানি দিশো দ্রবন্তি
সর্বে নমস্যন্তি চ সিদ্ধসঙ্ঘাঃ ॥ ১১-৩৬॥

কস্মাচ্চ তে ন নমেরন্মহাত্মন্
গরীয়সে ব্রহ্মণোঽপ্যাদিকর্ত্রে ।
অনন্ত দেবেশ জগন্নিবাস
ত্বমক্ষরং সদসত্তত্পরং যত্ ॥ ১১-৩৭॥

ত্বমাদিদেবঃ পুরুষঃ পুরাণস্-
ত্বমস্য বিশ্বস্য পরং নিধানম্ ।
বেত্তাসি বেদ্যং চ পরং চ ধাম
ত্বয়া ততং বিশ্বমনন্তরূপ ॥ ১১-৩৮॥

বায়ুর্যমোঽগ্নির্বরুণঃ শশাঙ্কঃ
প্রজাপতিস্ত্বং প্রপিতামহশ্চ ।
নমো নমস্তেঽস্তু সহস্রকৃত্বঃ
পুনশ্চ ভূয়োঽপি নমো নমস্তে ॥ ১১-৩৯॥

নমঃ পুরস্তাদথ পৃষ্ঠতস্তে
নমোঽস্তু তে সর্বত এব সর্ব ।
অনন্তবীর্যামিতবিক্রমস্ত্বং
সর্বং সমাপ্নোষি ততোঽসি সর্বঃ ॥ ১১-৪০॥

সখেতি মত্বা প্রসভং যদুক্তং
হে কৃষ্ণ হে যাদব হে সখেতি ।

BACK TO TOP

অজানতা মহিমানং তবেদং
ময়া প্রমাদাত্প্রণয়েন বাপি ॥ ১১-৪১॥

যচ্চাবহাসার্থমসত্কৃতোঽসি
বিহারশয্যাসনভোজনেষু ।
একোঽথবাপ্যচ্যুত তত্সমক্ষং
তত্ক্ষাময়ে ত্বামহমপ্রমেয়ম্ ॥ ১১-৪২॥

পিতাসি লোকস্য চরাচরস্য
ত্বমস্য পূজ্যশ্চ গুরুর্গরীয়ান্ ।
ন ত্বত্সমোঽস্ত্যভ্যধিকঃ কুতোঽন্যো
লোকত্রয়েঽপ্যপ্রতিমপ্রভাব ॥ ১১-৪৩॥

তস্মাত্প্রণম্য প্রণিধায় কায়ং
প্রসাদয়ে ত্বামহমীশমীড্যম্ ।
পিতেব পুত্রস্য সখেব সখ্যুঃ
প্রিয়ঃ প্রিয়ায়ার্হসি দেব সোঢুম্ ॥ ১১-৪৪॥

অদৃষ্টপূর্বং হৃষিতোঽস্মি দৃষ্ট্বা
ভয়েন চ প্রব্যথিতং মনো মে ।
তদেব মে দর্শয় দেব রূপং
প্রসীদ দেবেশ জগন্নিবাস ॥ ১১-৪৫॥

কিরীটিনং গদিনং চক্রহস্তং
ইচ্ছামি ত্বাং দ্রষ্টুমহং তথৈব ।
তেনৈব রূপেণ চতুর্ভুজেন
সহস্রবাহো ভব বিশ্বমূর্তে ॥ ১১-৪৬॥

শ্রীভগবানুবাচ ।

ময়া প্রসন্নেন তবার্জুনেদং
রূপং পরং দর্শিতমাত্মযোগাত্ ।
তেজোময়ং বিশ্বমনন্তমাদ্যং
যন্মে ত্বদন্যেন ন দৃষ্টপূর্বম্ ॥ ১১-৪৭॥

ন বেদযজ্ঞাধ্যয়নৈর্ন দানৈর্-
ন চ ক্রিয়াভির্ন তপোভিরুগ্রৈঃ ।
এবংরূপঃ শক্য অহং নৃলোকে
দ্রষ্টুং ত্বদন্যেন কুরুপ্রবীর ॥ ১১-৪৮॥

মা তে ব্যথা মা চ বিমূঢভাবো
দৃষ্ট্বা রূপং ঘোরমীদৃঙ্মমেদম্ ।
ব্যপেতভীঃ প্রীতমনাঃ পুনস্ত্বং
তদেব মে রূপমিদং প্রপশ্য ॥ ১১-৪৯॥

BACK TO TOP

সঞ্জয় উবাচ ।

ইত্যর্জুনং বাসুদেবস্তথোক্ত্বা
স্বকং রূপং দর্শয়ামাস ভূয়ঃ ।
আশ্বাসয়ামাস চ ভীতমেনং
ভূত্বা পুনঃ সৌম্যবপুর্মহাত্মা ॥ ১১-৫০॥

অর্জুন উবাচ ।

দৃষ্ট্বেদং মানুষং রূপং তব সৌম্যং জনার্দন ।
ইদানীমস্মি সংবৃত্তঃ সচেতাঃ প্রকৃতিং গতঃ ॥ ১১-৫১॥

শ্রীভগবানুবাচ ।

সুদুর্দর্শমিদং রূপং দৃষ্টবানসি যন্মম ।
দেবা অপ্যস্য রূপস্য নিত্যং দর্শনকাঙ্ক্ষিণঃ ॥ ১১-৫২॥

নাহং বেদৈর্ন তপসা ন দানেন ন চেজ্যয়া ।
শক্য এবংবিধো দ্রষ্টুং দৃষ্টবানসি মাং যথা ॥ ১১-৫৩॥

ভক্ত্যা ত্বনন্যয়া শক্য অহমেবংবিধোঽর্জুন ।
জ্ঞাতুং দ্রষ্টুং চ তত্ত্বেন প্রবেষ্টুং চ পরন্তপ ॥ ১১-৫৪॥

মত্কর্মকৃন্মত্পরমো মদ্ভক্তঃ সঙ্গবর্জিতঃ ।
নির্বৈরঃ সর্বভূতেষু যঃ স মামেতি পাণ্ডব ॥ ১১-৫৫॥

ওঁ তত্সদিতি শ্রীমদ্ভগবদ্গীতাসূপনিষত্সু
ব্রহ্মবিদ্যায়াং যোগশাস্ত্রে শ্রীকৃষ্ণার্জুনসংবাদে
বিশ্বরূপদর্শনয়োগো নামৈকাদশোঽধ্যায়ঃ ॥ ১১॥

অথ দ্বাদশোঽধ্যায়ঃ । ভক্তিয়োগঃ

অর্জুন উবাচ ।

এবং সততযুক্তা যে ভক্তাস্ত্বাং পর্যুপাসতে ।
যে চাপ্যক্ষরমব্যক্তং তেষাং কে যোগবিত্তমাঃ ॥ ১২-১॥

শ্রীভগবানুবাচ ।

ময্যাবেশ্য মনো যে মাং নিত্যযুক্তা উপাসতে ।
শ্রদ্ধয়া পরয়োপেতাঃ তে মে যুক্ততমা মতাঃ ॥ ১২-২॥

যে ত্বক্ষরমনির্দেশ্যমব্যক্তং পর্যুপাসতে ।
সর্বত্রগমচিন্ত্যঞ্চ কূটস্থমচলন্ধ্রুবম্ ॥ ১২-৩॥

সন্নিয়ম্যেন্দ্রিয়গ্রামং সর্বত্র সমবুদ্ধয়ঃ ।

BACK TO TOP

তে প্রাপ্নুবন্তি মামেব সর্বভূতহিতে রতাঃ ॥ ১২-৪॥

ক্লেশোঽধিকতরস্তেষামব্যক্তাসক্তচেতসাম্ ।
অব্যক্তা হি গতির্দুঃখং দেহবদ্ভিরবাপ্যতে ॥ ১২-৫॥

যে তু সর্বাণি কর্মাণি ময়ি সংন্যস্য মত্পরাঃ ।
অনন্যেনৈব যোগেন মাং ধ্যায়ন্ত উপাসতে ॥ ১২-৬॥

তেষামহং সমুদ্ধর্তা মৃত্যুসংসারসাগরাত্ ।
ভবামি নচিরাত্পার্থ ময্যাবেশিতচেতসাম্ ॥ ১২-৭॥

ময্যেব মন আধত্স্ব ময়ি বুদ্ধিং নিবেশয় ।
নিবসিষ্যসি ময্যেব অত ঊর্ধ্বং ন সংশয়ঃ ॥ ১২-৮॥

অথ চিত্তং সমাধাতুং ন শক্নোষি ময়ি স্থিরম্ ।
অভ্যাসযোগেন ততো মামিচ্ছাপ্তুং ধনঞ্জয় ॥ ১২-৯॥

অভ্যাসেঽপ্যসমর্থোঽসি মত্কর্মপরমো ভব ।
মদর্থমপি কর্মাণি কুর্বন্সিদ্ধিমবাপ্স্যসি ॥ ১২-১০॥

অথৈতদপ্যশক্তোঽসি কর্তুং মদ্যোগমাশ্রিতঃ ।
সর্বকর্মফলত্যাগং ততঃ কুরু যতাত্মবান্ ॥ ১২-১১॥

শ্রেয়ো হি জ্ঞানমভ্যাসাজ্জ্ঞানাদ্ধ্যানং বিশিষ্যতে ।
ধ্যানাত্কর্মফলত্যাগস্ত্যাগাচ্ছান্তিরনন্তরম্ ॥ ১২-১২॥

অদ্বেষ্টা সর্বভূতানাং মৈত্রঃ করুণ এব চ ।
নির্মমো নিরহঙ্কারঃ সমদুঃখসুখঃ ক্ষমী ॥ ১২-১৩॥

সন্তুষ্টঃ সততং যোগী যতাত্মা দৃঢনিশ্চয়ঃ ।
ময্যর্পিতমনোবুদ্ধির্যো মদ্ভক্তঃ স মে প্রিয়ঃ ॥ ১২-১৪॥

যস্মান্নোদ্বিজতে লোকো লোকান্নোদ্বিজতে চ যঃ ।
হর্ষামর্ষভয়োদ্বেগৈর্মুক্তো যঃ স চ মে প্রিয়ঃ ॥ ১২-১৫॥

অনপেক্ষঃ শুচির্দক্ষ উদাসীনো গতব্যথঃ ।
সর্বারম্ভপরিত্যাগী যো মদ্ভক্তঃ স মে প্রিয়ঃ ॥ ১২-১৬॥

যো ন হৃষ্যতি ন দ্বেষ্টি ন শোচতি ন কাঙ্ক্ষতি ।
শুভাশুভপরিত্যাগী ভক্তিমান্যঃ স মে প্রিয়ঃ ॥ ১২-১৭॥

সমঃ শত্রৌ চ মিত্রে চ তথা মানাপমানয়োঃ ।
শীতোষ্ণসুখদুঃখেষু সমঃ সঙ্গবিবর্জিতঃ ॥ ১২-১৮॥

তুল্যনিন্দাস্তুতির্মৌনী সন্তুষ্টো যেন কেনচিত্ ।
অনিকেতঃ স্থিরমতির্ভক্তিমান্মে প্রিয়ো নরঃ ॥ ১২-১৯॥

BACK TO TOP

য়ে তু ধর্ম্যামৃতমিদং য়থোক্তং পর্যুপাসতে ।
শ্রদ্দধানা মত্পরমা ভক্তাস্তেঽতীব মে প্রিয়াঃ ॥ ১২-২০॥

ওঁ তত্সদিতি শ্রীমদ্ভগবদ্গীতাসূপনিষত্সু
ব্রহ্মবিদ্যায়াং য়োগশাস্ত্রে শ্রীকৃষ্ণার্জুনসংবাদে
ভক্তিয়োগো নাম দ্বাদশোঽধ্যায়ঃ ॥ ১২॥

অথ ত্রয়োদশোঽধ্যায়ঃ । ক্ষেত্রক্ষেত্রজ্ঞবিভাগয়োগঃ

অর্জুন উবাচ ।

প্রকৃতিং পুরুষং চৈব ক্ষেত্রং ক্ষেত্রজ্ঞমেব চ ।
এতদ্বেদিতুমিচ্ছামি জ্ঞানং জ্ঞেয়ং চ কেশব ॥ ১৩-১॥

শ্রীভগবানুবাচ ।

ইদং শরীরং কৌন্তেয় ক্ষেত্রমিত্যভিধীয়তে ।
এতদ্যো বেত্তি তং প্রাহুঃ ক্ষেত্রজ্ঞ ইতি তদ্বিদঃ ॥ ১৩-২॥

ক্ষেত্রজ্ঞং চাপি মাং বিদ্ধি সর্বক্ষেত্রেষু ভারত ।
ক্ষেত্রক্ষেত্রজ্ঞয়োর্জ্ঞানং য়ত্তজ্জ্ঞানং মতং মম ॥ ১৩-৩॥

তত্ক্ষেত্রং য়চ্চ য়াদৃক্চ য়দ্বিকারি য়তশ্চ য়ত্ ।
স চ য়ো য়ত্প্রভাবশ্চ তত্সমাসেন মে শৃণু ॥ ১৩-৪॥

ঋষিভির্বহুধা গীতং ছন্দোভির্বিবিধৈঃ পৃথক্ ।
ব্রহ্মসূত্রপদৈশ্চৈব হেতুমদ্ভির্বিনিশ্চিতৈঃ ॥ ১৩-৫॥

মহাভূতান্যহঙ্কারো বুদ্ধিরব্যক্তমেব চ ।
ইন্দ্রিয়াণি দশৈকং চ পঞ্চ চেন্দ্রিয়গোচরাঃ ॥ ১৩-৬॥

ইচ্ছা দ্বেষঃ সুখং দুঃখং সঙ্ঘাতশ্চেতনা ধৃতিঃ ।
এতত্ক্ষেত্রং সমাসেন সবিকারমুদাহৃতম্ ॥ ১৩-৭॥

অমানিত্বমদম্ভিত্বমহিংসা ক্ষান্তিরার্জবম্ ।
আচার্যোপাসনং শৌচং স্থৈর্যমাত্মবিনিগ্রহঃ ॥ ১৩-৮॥

ইন্দ্রিয়ার্থেষু বৈরাগ্যমনহঙ্কার এব চ ।
জন্মমৃত্যুজরাব্যাধিদুঃখদোষানুদর্শনম্ ॥ ১৩-৯॥

অসক্তিরনভিষ্বঙ্গঃ পুত্রদারগৃহাদিষু ।
নিত্যং চ সমচিত্তত্বমিষ্টানিষ্টোপপত্তিষু ॥ ১৩-১০॥

ময়ি চানন্যয়োগেন ভক্তিরব্যভিচারিণী ।
বিবিক্তদেশসেবিত্বমরতির্জনসংসদি ॥ ১৩-১১॥

অধ্যাত্মজ্ঞাননিত্যত্বং তত্ত্বজ্ঞানার্থদর্শনম্ ।

BACK TO TOP

এতজ্জ্ঞানমিতি প্রোক্তমজ্ঞানং য়দতোঽন্যথা ॥ ১৩-১২॥

জ্ঞেয়ং য়ত্তত্প্রবক্ষ্যামি য়জ্জ্ঞাত্বামৃতমশ্নুতে ।
অনাদিমত্পরং ব্রহ্ম ন সত্তন্নাসদুচ্যতে ॥ ১৩-১৩॥

সর্বতঃ পাণিপাদং তত্সর্বতোঽক্ষিশিরোমুখম্ ।
সর্বতঃ শ্রুতিমল্লোকে সর্বমাবৃত্য তিষ্ঠতি ॥ ১৩-১৪॥

সর্বেন্দ্রিয়গুণাভাসং সর্বেন্দ্রিয়বিবর্জিতম্ ।
অসক্তং সর্বভৃচ্চৈব নির্গুণং গুণভোক্তৃ চ ॥ ১৩-১৫॥

বহিরন্তশ্চ ভূতানামচরং চরমেব চ ।
সূক্ষ্মত্বাত্তদবিজ্ঞেয়ং দূরস্থং চান্তিকে চ তত্ ॥ ১৩-১৬॥

অবিভক্তং চ ভূতেষু বিভক্তমিব চ স্থিতম্ ।
ভূতভর্তৃ চ তজ্জ্ঞেয়ং গ্রসিষ্ণু প্রভবিষ্ণু চ ॥ ১৩-১৭॥

জ্যোতিষামপি তজ্জ্যোতিস্তমসঃ পরমুচ্যতে ।
জ্ঞানং জ্ঞেয়ং জ্ঞানগম্যং হৃদি সর্বস্য বিষ্ঠিতম্ ॥ ১৩-১৮॥

ইতি ক্ষেত্রং তথা জ্ঞানং জ্ঞেয়ং চোক্তং সমাসতঃ ।
মদ্ভক্ত এতদ্বিজ্ঞায় মদ্ভাবায়োপপদ্যতে ॥ ১৩-১৯॥

প্রকৃতিং পুরুষং চৈব বিদ্ধ্যনাদী উভাবপি ।
বিকারাংশ্চ গুণাংশ্চৈব বিদ্ধি প্রকৃতিসম্ভবান্ ॥ ১৩-২০॥

কার্যকারণকর্তৃত্বে হেতুঃ প্রকৃতিরুচ্যতে ।
পুরুষঃ সুখদুঃখানাং ভোক্তৃত্বে হেতুরুচ্যতে ॥ ১৩-২১॥

পুরুষঃ প্রকৃতিস্থো হি ভুঙ্ক্তে প্রকৃতিজান্গুণান্ ।
কারণং গুণসঙ্গোঽস্য সদসদ্যোনিজন্মসু ॥ ১৩-২২॥

উপদ্রষ্টানুমন্তা চ ভর্তা ভোক্তা মহেশ্বরঃ ।
পরমাত্মেতি চাপ্যুক্তো দেহেঽস্মিন্পুরুষঃ পরঃ ॥ ১৩-২৩॥

য় এবং বেত্তি পুরুষং প্রকৃতিং চ গুণৈঃ সহ ।
সর্বথা বর্তমানোঽপি ন স ভূয়োঽভিজায়তে ॥ ১৩-২৪॥

ধ্যানেনাত্মনি পশ্যন্তি কেচিদাত্মানমাত্মনা ।
অন্যে সাঙ্খ্যেন য়োগেন কর্ময়োগেন চাপরে ॥ ১৩-২৫॥

অন্যে ত্বেবমজানন্তঃ শ্রুত্বান্যেভ্য উপাসতে ।
তেঽপি চাতিতরন্ত্যেব মৃত্যুং শ্রুতিপরায়ণাঃ ॥ ১৩-২৬॥

য়াবত্সঞ্জায়তে কিঞ্চিত্সত্ত্বং স্থাবরজঙ্গমম্ ।
ক্ষেত্রক্ষেত্রজ্ঞসংয়োগাত্তদ্বিদ্ধি ভরতর্ষভ ॥ ১৩-২৭॥

BACK TO TOP

সমং সর্বেষু ভূতেষু তিষ্ঠন্তং পরমেশ্বরম্ ।
বিনশ্যত্স্ববিনশ্যন্তং য়ঃ পশ্যতি স পশ্যতি ॥ ১৩-২৮॥

সমং পশ্যন্হি সর্বত্র সমবস্থিতমীশ্বরম্ ।
ন হিনস্ত্যাত্মনাত্মানং ততো য়াতি পরাং গতিম্ ॥ ১৩-২৯॥

প্রকৃত্যৈব চ কর্মাণি ক্রিয়মাণানি সর্বশঃ ।
য়ঃ পশ্যতি তথাত্মানমকর্তারং স পশ্যতি ॥ ১৩-৩০॥

য়দা ভূতপৃথগ্ভাবমেকস্থমনুপশ্যতি ।
তত এব চ বিস্তারং ব্রহ্ম সম্পদ্যতে তদা ॥ ১৩-৩১॥

অনাদিত্বান্নির্গুণত্বাত্পরমাত্মায়মব্যয়ঃ ।
শরীরস্থোঽপি কৌন্তেয় ন করোতি ন লিপ্যতে ॥ ১৩-৩২॥

য়থা সর্বগতং সৌক্ষ্ম্যাদাকাশং নোপলিপ্যতে ।
সর্বত্রাবস্থিতো দেহে তথাত্মা নোপলিপ্যতে ॥ ১৩-৩৩॥

য়থা প্রকাশয়ত্যেকঃ কৃত্স্নং লোকমিমং রবিঃ ।
ক্ষেত্রং ক্ষেত্রী তথা কৃত্স্নং প্রকাশয়তি ভারত ॥ ১৩-৩৪॥

ক্ষেত্রক্ষেত্রজ্ঞয়োরেবমন্তরং জ্ঞানচক্ষুষা ।
ভূতপ্রকৃতিমোক্ষং চ য়ে বিদুর্যান্তি তে পরম্ ॥ ১৩-৩৫॥

ওঁ তত্সদিতি শ্রীমদ্ভগবদ্গীতাসূপনিষত্সু
ব্রহ্মবিদ্যায়াং য়োগশাস্ত্রে শ্রীকৃষ্ণার্জুনসংবাদে
ক্ষেত্রক্ষেত্রজ্ঞবিভাগয়োগো নাম ত্রয়োদশোঽধ্যায়ঃ ॥ ১৩॥

অথ চতুর্দশোঽধ্যায়ঃ । গুণত্রয়বিভাগয়োগঃ

শ্রীভগবানুবাচ ।

পরং ভূয়ঃ প্রবক্ষ্যামি জ্ঞানানাং জ্ঞানমুত্তমম্ ।
য়জ্জ্ঞাত্বা মুনয়ঃ সর্বে পরাং সিদ্ধিমিতো গতাঃ ॥ ১৪-১॥

ইদং জ্ঞানমুপাশ্রিত্য মম সাধর্ম্যমাগতাঃ ।
সর্গেঽপি নোপজায়ন্তে প্রলয়ে ন ব্যথন্তি চ ॥ ১৪-২॥

মম য়োনির্মহদ্ ব্রহ্ম তস্মিন্গর্ভং দধাম্যহম্ ।
সম্ভবঃ সর্বভূতানাং ততো ভবতি ভারত ॥ ১৪-৩॥

সর্বয়োনিষু কৌন্তেয় মূর্তয়ঃ সম্ভবন্তি য়াঃ ।
তাসাং ব্রহ্ম মহদ্যোনিরহং বীজপ্রদঃ পিতা ॥ ১৪-৪॥

সত্ত্বং রজস্তম ইতি গুণাঃ প্রকৃতিসম্ভবাঃ ।
নিবধ্নন্তি মহাবাহো দেহে দেহিনমব্যয়ম্ ॥ ১৪-৫॥

BACK TO TOP

তত্র সত্ত্বং নির্মলত্বাত্প্রকাশকমনাময়ম্ ।
সুখসঙ্গেন বধ্নাতি জ্ঞানসঙ্গেন চানঘ ॥ ১৪-৬॥

রজো রাগাত্মকং বিদ্ধি তৃষ্ণাসঙ্গসমুদ্ভবম্ ।
তন্নিবধ্নাতি কৌন্তেয় কর্মসঙ্গেন দেহিনম্ ॥ ১৪-৭॥

তমস্ত্বজ্ঞানজং বিদ্ধি মোহনং সর্বদেহিনাম্ ।
প্রমাদালস্যনিদ্রাভিস্তন্নিবধ্নাতি ভারত ॥ ১৪-৮॥

সত্ত্বং সুখে সঞ্জয়তি রজঃ কর্মণি ভারত ।
জ্ঞানমাবৃত্য তু তমঃ প্রমাদে সঞ্জয়ত্যুত ॥ ১৪-৯॥

রজস্তমশ্চাভিভূয় সত্ত্বং ভবতি ভারত ।
রজঃ সত্ত্বং তমশ্চৈব তমঃ সত্ত্বং রজস্তথা ॥ ১৪-১০॥

সর্বদ্বারেষু দেহেঽস্মিন্প্রকাশ উপজায়তে ।
জ্ঞানং যদা তদা বিদ্যাদ্বিবৃদ্ধং সত্ত্বমিত্যুত ॥ ১৪-১১॥

লোভঃ প্রবৃত্তিরারম্ভঃ কর্মণামশমঃ স্পৃহা ।
রজস্যেতানি জায়ন্তে বিবৃদ্ধে ভরতর্ষভ ॥ ১৪-১২॥

অপ্রকাশোঽপ্রবৃত্তিশ্চ প্রমাদো মোহ এব চ ।
তমস্যেতানি জায়ন্তে বিবৃদ্ধে কুরুনন্দন ॥ ১৪-১৩॥

যদা সত্ত্বে প্রবৃদ্ধে তু প্রলয়ং যাতি দেহভৃত্ ।
তদোত্তমবিদাং লোকানমলান্প্রতিপদ্যতে ॥ ১৪-১৪॥

রজসি প্রলয়ং গত্বা কর্মসঙ্গিষু জায়তে ।
তথা প্রলীনস্তমসি মূঢয়োনিষু জায়তে ॥ ১৪-১৫॥

কর্মণঃ সুকৃতস্যাহুঃ সাত্ত্বিকং নির্মলং ফলম্ ।
রজসস্তু ফলং দুঃখমজ্ঞানং তমসঃ ফলম্ ॥ ১৪-১৬॥

সত্ত্বাত্সঞ্জায়তে জ্ঞানং রজসো লোভ এব চ ।
প্রমাদমোহৌ তমসো ভবতোঽজ্ঞানমেব চ ॥ ১৪-১৭॥

ঊর্ধ্বং গচ্ছন্তি সত্ত্বস্থা মধ্যে তিষ্ঠন্তি রাজসাঃ ।
জঘন্যগুণবৃত্তিস্থা অধো গচ্ছন্তি তামসাঃ ॥ ১৪-১৮॥

নান্যং গুণেভ্যঃ কর্তারং যদা দ্রষ্টানুপশ্যতি ।
গুণেভ্যশ্চ পরং বেত্তি মদ্ভাবং সোঽধিগচ্ছতি ॥ ১৪-১৯॥

গুণানেতানতীত্য ত্রীন্দেহী দেহসমুদ্ভবান্ ।
জন্মমৃত্যুজরাদুঃখৈর্বিমুক্তোঽমৃতমশ্নুতে ॥ ১৪-২০॥

অর্জুন উবাচ ।

BACK TO TOP

কৈর্লিঙ্গৈস্ত্রীন্গুণানেতানতীতো ভবতি প্রভো ।
কিমাচারঃ কথং চৈতাংস্ত্রীন্গুণানতিবর্ততে ॥ ১৪-২১॥

শ্রীভগবানুবাচ ।

প্রকাশং চ প্রবৃত্তিং চ মোহমেব চ পাণ্ডব ।
ন দ্বেষ্টি সম্প্রবৃত্তানি ন নিবৃত্তানি কাঙ্ক্ষতি ॥ ১৪-২২॥

উদাসীনবদাসীনো গুণৈর্যো ন বিচাল্যতে ।
গুণা বর্তন্ত ইত্যেবং যোঽবতিষ্ঠতি নেঙ্গতে ॥ ১৪-২৩॥

সমদুঃখসুখঃ স্বস্থঃ সমলোষ্টাশ্মকাঞ্চনঃ ।
তুল্যপ্রিয়াপ্রিয়ো ধীরস্তুল্যনিন্দাত্মসংস্তুতিঃ ॥ ১৪-২৪॥

মানাপমানয়োস্তুল্যস্তুল্যো মিত্রারিপক্ষয়োঃ ।
সর্বারম্ভপরিত্যাগী গুণাতীতঃ স উচ্যতে ॥ ১৪-২৫॥

মাং চ যোঽব্যভিচারেণ ভক্তিযোগেন সেবতে ।
স গুণান্সমতীত্যৈতান্ব্রহ্মভূয়ায় কল্পতে ॥ ১৪-২৬॥

ব্রহ্মণো হি প্রতিষ্ঠাহমমৃতস্যাব্যয়স্য চ ।
শাশ্বতস্য চ ধর্মস্য সুখস্যৈকান্তিকস্য চ ॥ ১৪-২৭॥

ওঁ তত্সদিতি শ্রীমদ্ভগবদ্গীতাসূপনিষত্সু
ব্রহ্মবিদ্যায়াং যোগশাস্ত্রে শ্রীকৃষ্ণার্জুনসংবাদে
গুণত্রয়বিভাগযোগো নাম চতুর্দশোঽধ্যায়ঃ ॥ ১৪॥

অথ পঞ্চদশোঽধ্যায়ঃ । পুরুষোত্তমযোগঃ

শ্রীভগবানুবাচ ।

ঊর্ধ্বমূলমধঃশাখমশ্বত্থং প্রাহুরব্যয়ম্ ।
ছন্দাংসি যস্য পর্ণানি যস্তং বেদ স বেদবিত্ ॥ ১৫-১॥

অধশ্চোর্ধ্বং প্রসৃতাস্তস্য শাখা
গুণপ্রবৃদ্ধা বিষয়প্রবালাঃ ।
অধশ্চ মূলান্যনুসন্ততানি
কর্মানুবন্ধীনি মনুষ্যলোকে ॥ ১৫-২॥

ন রূপমস্যেহ তথোপলভ্যতে
নান্তো ন চাদির্ন চ সম্প্রতিষ্ঠা ।
অশ্বত্থমেনং সুবিরূঢমূলং
অসঙ্গশস্ত্রেণ দৃঢেন ছিত্ত্বা ॥ ১৫-৩॥

ততঃ পদং তত্পরিমার্গিতব্যং
যস্মিন্গতা ন নিবর্তন্তি ভূয়ঃ ।
তমেব চাদ্যং পুরুষং প্রপদ্যে ।

BACK TO TOP

য়তঃ প্রবৃত্তিঃ প্রসৃতা পুরাণী ॥ ১৫-৪॥

নির্মানমোহা জিতসঙ্গদোষা
অধ্যাত্মনিত্যা বিনিবৃত্তকামাঃ ।
দ্বন্দ্বৈর্বিমুক্তাঃ সুখদুঃখসংজ্ঞৈর্-
গচ্ছন্ত্যমূঢাঃ পদমব্যয়ং তত্ ॥ ১৫-৫॥

ন তদ্ভাসয়তে সূর্যো ন শশাঙ্কো ন পাবকঃ ।
য়দ্গত্বা ন নিবর্তন্তে তদ্ধাম পরমং মম ॥ ১৫-৬॥

মমৈবাংশো জীবলোকে জীবভূতঃ সনাতনঃ ।
মনঃষষ্ঠানীন্দ্রিয়াণি প্রকৃতিস্থানি কর্ষতি ॥ ১৫-৭॥

শরীরং য়দবাপ্নোতি য়চ্চাপ্যুত্ক্রামতীশ্বরঃ ।
গৃহীত্বৈতানি সংয়াতি বায়ুর্গন্ধানিবাশয়াত্ ॥ ১৫-৮॥

শ্রোত্রং চক্ষুঃ স্পর্শনং চ রসনং ঘ্রাণমেব চ ।
অধিষ্ঠায় মনশ্চায়ং বিষয়ানুপসেবতে ॥ ১৫-৯॥

উত্ক্রামন্তং স্থিতং বাপি ভুঞ্জানং বা গুণান্বিতম্ ।
বিমূঢা নানুপশ্যন্তি পশ্যন্তি জ্ঞানচক্ষুষঃ ॥ ১৫-১০॥

য়তন্তো য়োগিনশ্চৈনং পশ্যন্ত্যাত্মন্যবস্থিতম্ ।
য়তন্তোঽপ্যকৃতাত্মানো নৈনং পশ্যন্ত্যচেতসঃ ॥ ১৫-১১॥

য়দাদিত্যগতং তেজো জগদ্ভাসয়তেঽখিলম্ ।
য়চ্চন্দ্রমসি য়চ্চাগ্নৌ তত্তেজো বিদ্ধি মামকম্ ॥ ১৫-১২॥

গামাবিশ্য চ ভূতানি ধারয়াম্যহমোজসা ।
পুষ্ণামি চৌষধীঃ সর্বাঃ সোমো ভূত্বা রসাত্মকঃ ॥ ১৫-১৩॥

অহং বৈশ্বানরো ভূত্বা প্রাণিনাং দেহমাশ্রিতঃ ।
প্রাণাপানসমায়ুক্তঃ পচাম্যন্নং চতুর্বিধম্ ॥ ১৫-১৪॥

সর্বস্য চাহং হৃদি সন্নিবিষ্টো
মত্তঃ স্মৃতির্জ্ঞানমপোহনঞ্চ ।
বেদৈশ্চ সর্বৈরহমেব বেদ্যো
বেদান্তকৃদ্বেদবিদেব চাহম্ ॥ ১৫-১৫॥

দ্বাবিমৌ পুরুষৌ লোকে ক্ষরশ্চাক্ষর এব চ ।
ক্ষরঃ সর্বাণি ভূতানি কূটস্থোঽক্ষর উচ্যতে ॥ ১৫-১৬॥

উত্তমঃ পুরুষস্ত্বন্যঃ পরমাত্মেত্যুদাহৃতঃ ।
য়ো লোকত্রয়মাবিশ্য বিভর্ত্যব্যয় ঈশ্বরঃ ॥ ১৫-১৭॥

য়স্মাত্ক্ষরমতীতোঽহমক্ষরাদপি চোত্তমঃ ।
অতোঽস্মি লোকে বেদে চ প্রথিতঃ পুরুষোত্তমঃ ॥ ১৫-১৮॥

BACK TO TOP

য়ো মামেবমসম্মূঢো জানাতি পুরুষোত্তমম্ ।
স সর্ববিদ্ভজতি মাং সর্বভাবেন ভারত ॥ ১৫-১৯॥

ইতি গুহ্যতমং শাস্ত্রমিদমুক্তং ময়ানঘ ।
এতদ্বুদ্ধ্বা বুদ্ধিমান্স্যাত্কৃতকৃত্যশ্চ ভারত ॥ ১৫-২০॥

ওঁ তত্সদিতি শ্রীমদ্ভগবদ্গীতাসূপনিষত্সু
ব্রহ্মবিদ্যায়াং য়োগশাস্ত্রে শ্রীকৃষ্ণার্জুন সংবাদে
পুরুষোত্তময়োগো নাম পঞ্চদশোঽধ্যায়ঃ ॥ ১৫॥

অথ ষোডশোঽধ্যায়ঃ । দৈবাসুরসম্পদ্বিভাগয়োগঃ

শ্রীভগবানুবাচ ।

অভয়ং সত্ত্বসংশুদ্ধির্জ্ঞানয়োগব্যবস্থিতিঃ ।
দানং দমশ্চ য়জ্ঞশ্চ স্বাধ্যায়স্তপ আর্জবম্ ॥ ১৬-১॥

অহিংসা সত্যমক্রোধস্ত্যাগঃ শান্তিরপৈশুনম্ ।
দয়া ভূতেষ্বলোলুপ্ত্বং মার্দবং হ্রীরচাপলম্ ॥ ১৬-২॥

তেজঃ ক্ষমা ধৃতিঃ শৌচমদ্রোহো নাতিমানিতা ।
ভবন্তি সম্পদং দৈবীমভিজাতস্য ভারত ॥ ১৬-৩॥

দম্ভো দর্পোঽভিমানশ্চ ক্রোধঃ পারুষ্যমেব চ ।
অজ্ঞানং চাভিজাতস্য পার্থ সম্পদমাসুরীম্ ॥ ১৬-৪॥

দৈবী সম্পদ্বিমোক্ষায় নিবন্ধায়াসুরী মতা ।
মা শুচঃ সম্পদং দৈবীমভিজাতোঽসি পাণ্ডব ॥ ১৬-৫॥

দ্বৌ ভূতসর্গৌ লোকেঽস্মিন্দৈব আসুর এব চ ।
দৈবো বিস্তরশঃ প্রোক্ত আসুরং পার্থ মে শৃণু ॥ ১৬-৬॥

প্রবৃত্তিং চ নিবৃত্তিং চ জনা ন বিদুরাসুরাঃ ।
ন শৌচং নাপি চাচারো ন সত্যং তেষু বিদ্যতে ॥ ১৬-৭॥

অসত্যমপ্রতিষ্ঠং তে জগদাহুরনীশ্বরম্ ।
অপরস্পরসম্ভূতং কিমন্যত্কামহৈতুকম্ ॥ ১৬-৮॥

এতাং দৃষ্টিমবষ্টভ্য নষ্টাত্মানোঽল্পবুদ্ধয়ঃ ।
প্রভবন্ত্যুগ্রকর্মাণঃ ক্ষয়ায় জগতোঽহিতাঃ ॥ ১৬-৯॥

কামমাশ্রিত্য দুষ্পূরং দম্ভমানমদান্বিতাঃ ।
মোহাদ্গৃহীত্বাসদ্গ্রাহান্প্রবর্তন্তেঽশুচিব্রতাঃ ॥ ১৬-১০॥

চিন্তামপরিমেয়াং চ প্রলয়ান্তামুপাশ্রিতাঃ ।
কামোপভোগপরমা এতাবদিতি নিশ্চিতাঃ ॥ ১৬-১১॥

BACK TO TOP

আশাপাশশতৈর্বদ্ধাঃ কামক্রোধপরায়ণাঃ ।
ঈহন্তে কামভোগার্থমন্যায়েনার্থসঞ্চয়ান্ ॥ ১৬-১২॥

ইদমদ্য ময়া লব্ধমিমং প্রাপ্স্যে মনোরথম্ ।
ইদমস্তীদমপি মে ভবিষ্যতি পুনর্ধনম্ ॥ ১৬-১৩॥

অসৌ ময়া হতঃ শত্রুর্হনিষ্যে চাপরানপি ।
ঈশ্বরোঽহমহং ভোগী সিদ্ধোঽহং বলবান্সুখী ॥ ১৬-১৪॥

আঢ্যোঽভিজনবানস্মি কোঽন্যোঽস্তি সদৃশো ময়া ।
য়ক্ষ্যে দাস্যামি মোদিষ্য ইত্যজ্ঞানবিমোহিতাঃ ॥ ১৬-১৫॥

অনেকচিত্তবিভ্রান্তা মোহজালসমাবৃতাঃ ।
প্রসক্তাঃ কামভোগেষু পতন্তি নরকেঽশুচৌ ॥ ১৬-১৬॥

আত্মসম্ভাবিতাঃ স্তব্ধা ধনমানমদান্বিতাঃ ।
য়জন্তে নাময়জ্ঞৈস্তে দম্ভেনাবিধিপূর্বকম্ ॥ ১৬-১৭॥

অহঙ্কারং বলং দর্পং কামং ক্রোধং চ সংশ্রিতাঃ ।
মামাত্মপরদেহেষু প্রদ্বিষন্তোঽভ্যসূয়কাঃ ॥ ১৬-১৮॥

তানহং দ্বিষতঃ ক্রূরান্সংসারেষু নরাধমান্ ।
ক্ষিপাম্যজস্রমশুভানাসুরীষ্বেব য়োনিষু ॥ ১৬-১৯॥

আসুরীং য়োনিমাপন্না মূঢা জন্মনি জন্মনি ।
মামপ্রাপ্যৈব কৌন্তেয় ততো য়ান্ত্যধমাং গতিম্ ॥ ১৬-২০॥

ত্রিবিধং নরকস্যেদং দ্বারং নাশনমাত্মনঃ ।
কামঃ ক্রোধস্তথা লোভস্তস্মাদেতত্ত্রয়ং ত্যজেত্ ॥ ১৬-২১॥

এতৈর্বিমুক্তঃ কৌন্তেয় তমোদ্বারৈস্ত্রিভির্নরঃ ।
আচরত্যাত্মনঃ শ্রেয়স্ততো য়াতি পরাং গতিম্ ॥ ১৬-২২॥

য়ঃ শাস্ত্রবিধিমুত্সৃজ্য বর্ততে কামকারতঃ ।
ন স সিদ্ধিমবাপ্নোতি ন সুখং ন পরাং গতিম্ ॥ ১৬-২৩॥

তস্মাচ্ছাস্ত্রং প্রমাণং তে কার্যাকার্যব্যবস্থিতৌ ।
জ্ঞাত্বা শাস্ত্রবিধানোক্তং কর্ম কর্তুমিহার্হসি ॥ ১৬-২৪॥

ওঁ তত্সদিতি শ্রীমদ্ভগবদ্গীতাসূপনিষত্সু
ব্রহ্মবিদ্যায়াং য়োগশাস্ত্রে শ্রীকৃষ্ণার্জুনসংবাদে
দৈবাসুরসম্পদ্বিভাগয়োগো নাম ষোডশোঽধ্যায়ঃ ॥ ১৬॥

অথ সপ্তদশোঽধ্যায়ঃ । শ্রদ্ধাত্রয়বিভাগয়োগঃ

অর্জুন উবাচ ।

BACK TO TOP

য়ে শাস্ত্রবিধিমুত্সৃজ্য য়জন্তে শ্রদ্ধয়ান্বিতাঃ ।
তেষাং নিষ্ঠা তু কা কৃষ্ণ সত্ত্বমাহো রজস্তমঃ ॥ ১৭-১॥

শ্রীভগবানুবাচ ।

ত্রিবিধা ভবতি শ্রদ্ধা দেহিনাং সা স্বভাবজা ।
সাত্ত্বিকী রাজসী চৈব তামসী চেতি তাং শৃণু ॥ ১৭-২॥

সত্ত্বানুরূপা সর্বস্য শ্রদ্ধা ভবতি ভারত ।
শ্রদ্ধাময়োঽয়ং পুরুষো য়ো য়চ্ছ্রদ্ধঃ স এব সঃ ॥ ১৭-৩॥

য়জন্তে সাত্ত্বিকা দেবান্যক্ষরক্ষাংসি রাজসাঃ ।
প্রেতান্ভূতগণাংশ্চান্যে য়জন্তে তামসা জনাঃ ॥ ১৭-৪॥

অশাস্ত্রবিহিতং ঘোরং তপ্যন্তে য়ে তপো জনাঃ ।
দম্ভাহঙ্কারসংয়ুক্তাঃ কামরাগবলান্বিতাঃ ॥ ১৭-৫॥

কর্ষয়ন্তঃ শরীরস্থং ভূতগ্রামমচেতসঃ ।
মাং চৈবান্তঃশরীরস্থং তান্বিদ্ধ্যাসুরনিশ্চয়ান্ ॥ ১৭-৬॥

আহারস্ত্বপি সর্বস্য ত্রিবিধো ভবতি প্রিয়ঃ ।
য়জ্ঞস্তপস্তথা দানং তেষাং ভেদমিমং শৃণু ॥ ১৭-৭॥

আয়ুঃসত্ত্ববলারোগ্যসুখপ্রীতিবিবর্ধনাঃ ।
রস্যাঃ স্নিগ্ধাঃ স্থিরা হৃদ্যা আহারাঃ সাত্ত্বিকপ্রিয়াঃ ॥ ১৭-৮॥

কট্বম্ললবণাত্যুষ্ণতীক্ষ্ণরূক্ষবিদাহিনঃ ।
আহারা রাজসস্যেষ্টা দুঃখশোকাময়প্রদাঃ ॥ ১৭-৯॥

য়াতয়ামং গতরসং পূতি পর্যুষিতং চ য়ত্ ।
উচ্ছিষ্টমপি চামেধ্যং ভোজনং তামসপ্রিয়ম্ ॥ ১৭-১০॥

অফলাকাঙ্ক্ষিভির্যজ্ঞো বিধিদৃষ্টো য় ইজ্যতে ।
য়ষ্টব্যমেবেতি মনঃ সমাধায় স সাত্ত্বিকঃ ॥ ১৭-১১॥

অভিসন্ধায় তু ফলং দম্ভার্থমপি চৈব য়ত্ ।
ইজ্যতে ভরতশ্রেষ্ঠ তং য়জ্ঞং বিদ্ধি রাজসম্ ॥ ১৭-১২॥

বিধিহীনমসৃষ্টান্নং মন্ত্রহীনমদক্ষিণম্ ।
শ্রদ্ধাবিরহিতং য়জ্ঞং তামসং পরিচক্ষতে ॥ ১৭-১৩॥

দেবদ্বিজগুরুপ্রাজ্ঞপূজনং শৌচমার্জবম্ ।
ব্রহ্মচর্যমহিংসা চ শারীরং তপ উচ্যতে ॥ ১৭-১৪॥

অনুদ্বেগকরং বাক্যং সত্যং প্রিয়হিতং চ য়ত্ ।
স্বাধ্যায়াভ্যসনং চৈব বাঙ্ময়ং তপ উচ্যতে ॥ ১৭-১৫॥

BACK TO TOP

মনঃ প্রসাদঃ সৌম্যত্বং মৌনমাত্মবিনিগ্রহঃ ।
ভাবসংশুদ্ধিরিত্যেতত্তপো মানসমুচ্যতে ॥ ১৭-১৬॥

শ্রদ্ধয়া পরয়া তপ্তং তপস্তত্ত্রিবিধং নরৈঃ ।
অফলাকাঙ্ক্ষিভির্যুক্তৈঃ সাত্ত্বিকং পরিচক্ষতে ॥ ১৭-১৭॥

সত্কারমানপূজার্থং তপো দম্ভেন চৈব য়ত্ ।
ক্রিয়তে তদিহ প্রোক্তং রাজসং চলমধ্রুবম্ ॥ ১৭-১৮॥

মূঢগ্রাহেণাত্মনো য়ত্পীডয়া ক্রিয়তে তপঃ ।
পরস্যোত্সাদনার্থং বা তত্তামসমুদাহৃতম্ ॥ ১৭-১৯॥

দাতব্যমিতি য়দ্দানং দীয়তেঽনুপকারিণে ।
দেশে কালে চ পাত্রে চ তদ্দানং সাত্ত্বিকং স্মৃতম্ ॥ ১৭-২০॥

য়ত্তু প্রত্যুপকারার্থং ফলমুদ্দিশ্য বা পুনঃ ।
দীয়তে চ পরিক্লিষ্টং তদ্দানং রাজসং স্মৃতম্ ॥ ১৭-২১॥

অদেশকালে য়দ্দানমপাত্রেভ্যশ্চ দীয়তে ।
অসত্কৃতমবজ্ঞাতং তত্তামসমুদাহৃতম্ ॥ ১৭-২২॥

ওঁতত্সদিতি নির্দেশো ব্রহ্মণস্ত্রিবিধঃ স্মৃতঃ ।
ব্রাহ্মণাস্তেন বেদাশ্চ য়জ্ঞাশ্চ বিহিতাঃ পুরা ॥ ১৭-২৩॥

তস্মাদোমিত্যুদাহৃত্য য়জ্ঞদানতপঃক্রিয়াঃ ।
প্রবর্তন্তে বিধানোক্তাঃ সততং ব্রহ্মবাদিনাম্ ॥ ১৭-২৪॥

তদিত্যনভিসন্ধায় ফলং য়জ্ঞতপঃক্রিয়াঃ ।
দানক্রিয়াশ্চ বিবিধাঃ ক্রিয়ন্তে মোক্ষকাঙ্ক্ষিভিঃ ॥ ১৭-২৫॥

সদ্ভাবে সাধুভাবে চ সদিত্যেতত্প্রয়ুজ্যতে ।
প্রশস্তে কর্মণি তথা সচ্ছব্দঃ পার্থ য়ুজ্যতে ॥ ১৭-২৬॥

য়জ্ঞে তপসি দানে চ স্থিতিঃ সদিতি চোচ্যতে ।
কর্ম চৈব তদর্থীয়ং সদিত্যেবাভিধীয়তে ॥ ১৭-২৭॥

অশ্রদ্ধয়া হুতং দত্তং তপস্তপ্তং কৃতং চ য়ত্ ।
অসদিত্যুচ্যতে পার্থ ন চ তত্প্রেত্য নো ইহ ॥ ১৭-২৮॥

ওঁ তত্সদিতি শ্রীমদ্ভগবদ্গীতাসূপনিষত্সু
ব্রহ্মবিদ্যায়াং য়োগশাস্ত্রে শ্রীকৃষ্ণার্জুনসংবাদে
শ্রদ্ধাত্রয়বিভাগয়োগো নাম সপ্তদশোঽধ্যায়ঃ ॥ ১৭॥

অথাষ্টাদশোঽধ্যায়ঃ । মোক্ষসংন্যাসয়োগঃ

অর্জুন উবাচ ।

BACK TO TOP

সংন্যাসস্য মহাবাহো তত্ত্বমিচ্ছামি বেদিতুম্ ।
ত্যাগস্য চ হৃষীকেশ পৃথক্কেশিনিষূদন ॥ ১৮-১॥

শ্রীভগবানুবাচ ।

কাম্যানাং কর্মণাং ন্যাসং সংন্যাসং কবয়ো বিদুঃ ।
সর্বকর্মফলত্যাগং প্রাহুস্ত্যাগং বিচক্ষণাঃ ॥ ১৮-২॥

ত্যাজ্যং দোষবদিত্যেকে কর্ম প্রাহুর্মনীষিণঃ ।
য়জ্ঞদানতপঃকর্ম ন ত্যাজ্যমিতি চাপরে ॥ ১৮-৩॥

নিশ্চয়ং শৃণু মে তত্র ত্যাগে ভরতসত্তম ।
ত্যাগো হি পুরুষব্যাঘ্র ত্রিবিধঃ সম্প্রকীর্তিতঃ ॥ ১৮-৪॥

য়জ্ঞদানতপঃকর্ম ন ত্যাজ্যং কার্যমেব তত্ ।
য়জ্ঞো দানং তপশ্চৈব পাবনানি মনীষিণাম্ ॥ ১৮-৫॥

এতান্যপি তু কর্মাণি সঙ্গং ত্যক্ত্বা ফলানি চ ।
কর্তব্যানীতি মে পার্থ নিশ্চিতং মতমুত্তমম্ ॥ ১৮-৬॥

নিয়তস্য তু সংন্যাসঃ কর্মণো নোপপদ্যতে ।
মোহাত্তস্য পরিত্যাগস্তামসঃ পরিকীর্তিতঃ ॥ ১৮-৭॥

দুঃখমিত্যেব য়ত্কর্ম কায়ক্লেশভয়াত্ত্যজেত্ ।
স কৃত্বা রাজসং ত্যাগং নৈব ত্যাগফলং লভেত্ ॥ ১৮-৮॥

কার্যমিত্যেব য়ত্কর্ম নিয়তং ক্রিয়তেঽর্জুন ।
সঙ্গং ত্যক্ত্বা ফলং চৈব স ত্যাগঃ সাত্ত্বিকো মতঃ ॥ ১৮-৯॥

ন দ্বেষ্ট্যকুশলং কর্ম কুশলে নানুষজ্জতে ।
ত্যাগী সত্ত্বসমাবিষ্টো মেধাবী ছিন্নসংশয়ঃ ॥ ১৮-১০॥

ন হি দেহভৃতা শক্যং ত্যক্তুং কর্মাণ্যশেষতঃ ।
য়স্তু কর্মফলত্যাগী স ত্যাগীত্যভিধীয়তে ॥ ১৮-১১॥

অনিষ্টমিষ্টং মিশ্রং চ ত্রিবিধং কর্মণঃ ফলম্ ।
ভবত্যত্যাগিনাং প্রেত্য ন তু সংন্যাসিনাং ক্বচিত্ ॥ ১৮-১২॥

পঞ্চৈতানি মহাবাহো কারণানি নিবোধ মে ।
সাঙ্খ্যে কৃতান্তে প্রোক্তানি সিদ্ধয়ে সর্বকর্মণাম্ ॥ ১৮-১৩॥

অধিষ্ঠানং তথা কর্তা করণং চ পৃথগ্বিধম্ ।
বিবিধাশ্চ পৃথক্চেষ্টা দৈবং চৈবাত্র পঞ্চমম্ ॥ ১৮-১৪॥

শরীরবাঙ্মনোভির্যত্কর্ম প্রারভতে নরঃ ।
ন্যায্যং বা বিপরীতং বা পঞ্চৈতে তস্য হেতবঃ ॥ ১৮-১৫॥

BACK TO TOP

তত্রৈবং সতি কর্তারমাত্মানং কেবলং তু য়ঃ ।
পশ্যত্যকৃতবুদ্ধিত্বান্ন স পশ্যতি দুর্মতিঃ ॥ ১৮-১৬॥

য়স্য নাহঙ্কৃতো ভাবো বুদ্ধির্যস্য ন লিপ্যতে ।
হত্বাঽপি স ইমাঁল্লোকান্ন হন্তি ন নিবধ্যতে ॥ ১৮-১৭॥

জ্ঞানং জ্ঞেয়ং পরিজ্ঞাতা ত্রিবিধা কর্মচোদনা ।
করণং কর্ম কর্তেতি ত্রিবিধঃ কর্মসঙ্গ্রহঃ ॥ ১৮-১৮॥

জ্ঞানং কর্ম চ কর্তা চ ত্রিধৈব গুণভেদতঃ ।
প্রোচ্যতে গুণসঙ্খ্যানে য়থাবচ্ছৃণু তান্যপি ॥ ১৮-১৯॥

সর্বভূতেষু য়েনৈকং ভাবমব্যয়মীক্ষতে ।
অবিভক্তং বিভক্তেষু তজ্জ্ঞানং বিদ্ধি সাত্ত্বিকম্ ॥ ১৮-২০॥

পৃথক্ত্বেন তু য়জ্জ্ঞানং নানাভাবান্পৃথগ্বিধান্ ।
বেত্তি সর্বেষু ভূতেষু তজ্জ্ঞানং বিদ্ধি রাজসম্ ॥ ১৮-২১॥

য়ত্তু কৃত্স্নবদেকস্মিন্কার্যে সক্তমহৈতুকম্ ।
অতত্ত্বার্থবদল্পং চ তত্তামসমুদাহৃতম্ ॥ ১৮-২২॥

নিয়তং সঙ্গরহিতমরাগদ্বেষতঃ কৃতম্ ।
অফলপ্রেপ্সুনা কর্ম য়ত্তত্সাত্ত্বিকমুচ্যতে ॥ ১৮-২৩॥

য়ত্তু কামেপ্সুনা কর্ম সাহঙ্কারেণ বা পুনঃ ।
ক্রিয়তে বহুলায়াসং তদ্রাজসমুদাহৃতম্ ॥ ১৮-২৪॥

অনুবন্ধং ক্ষয়ং হিংসামনপেক্ষ্য চ পৌরুষম্ ।
মোহাদারভ্যতে কর্ম য়ত্তত্তামসমুচ্যতে ॥ ১৮-২৫॥

মুক্তসঙ্গোঽনহংবাদী ধৃত্যুত্সাহসমন্বিতঃ ।
সিদ্ধ্যসিদ্ধ্যোর্নির্বিকারঃ কর্তা সাত্ত্বিক উচ্যতে ॥ ১৮-২৬॥

রাগী কর্মফলপ্রেপ্সুর্লুব্ধো হিংসাত্মকোঽশুচিঃ ।
হর্ষশোকান্বিতঃ কর্তা রাজসঃ পরিকীর্তিতঃ ॥ ১৮-২৭॥

অয়ুক্তঃ প্রাকৃতঃ স্তব্ধঃ শঠো নৈষ্কৃতিকোঽলসঃ ।
বিষাদী দীর্ঘসূত্রী চ কর্তা তামস উচ্যতে ॥ ১৮-২৮॥

বুদ্ধের্ভেদং ধৃতেশ্চৈব গুণতস্ত্রিবিধং শৃণু ।
প্রোচ্যমানমশেষেণ পৃথক্ত্বেন ধনঞ্জয় ॥ ১৮-২৯॥

প্রবৃত্তিং চ নিবৃত্তিং চ কার্যাকার্যে ভয়াভয়ে ।
বন্ধং মোক্ষং চ য়া বেত্তি বুদ্ধিঃ সা পার্থ সাত্ত্বিকী ॥ ১৮-৩০॥

য়য়া ধর্মমধর্মং চ কার্যং চাকার্যমেব চ ।

BACK TO TOP

অয়থাবত্প্রজানাতি বুদ্ধিঃ সা পার্থ রাজসী ॥ ১৮-৩১॥

অধর্মং ধর্মমিতি য়া মন্যতে তমসাবৃতা ।
সর্বার্থান্বিপরীতাংশ্চ বুদ্ধিঃ সা পার্থ তামসী ॥ ১৮-৩২॥

ধৃত্যা য়য়া ধারয়তে মনঃপ্রাণেন্দ্রিয়ক্রিয়াঃ ।
য়োগেনাব্যভিচারিণ্যা ধৃতিঃ সা পার্থ সাত্ত্বিকী ॥ ১৮-৩৩॥

য়য়া তু ধর্মকামার্থান্ধৃত্যা ধারয়তেঽর্জুন ।
প্রসঙ্গেন ফলাকাঙ্ক্ষী ধৃতিঃ সা পার্থ রাজসী ॥ ১৮-৩৪॥

য়য়া স্বপ্নং ভয়ং শোকং বিষাদং মদমেব চ ।
ন বিমুঞ্চতি দুর্মেধা ধৃতিঃ সা পার্থ তামসী ॥ ১৮-৩৫॥

সুখং ত্বিদানীং ত্রিবিধং শৃণু মে ভরতর্ষভ ।
অভ্যাসাদ্রমতে য়ত্র দুঃখান্তং চ নিগচ্ছতি ॥ ১৮-৩৬॥

য়ত্তদগ্রে বিষমিব পরিণামেঽমৃতোপমম্ ।
তত্সুখং সাত্ত্বিকং প্রোক্তমাত্মবুদ্ধিপ্রসাদজম্ ॥ ১৮-৩৭॥

বিষয়েন্দ্রিয়সংয়োগাদ্যত্তদগ্রেঽমৃতোপমম্ ।
পরিণামে বিষমিব তত্সুখং রাজসং স্মৃতম্ ॥ ১৮-৩৮॥

য়দগ্রে চানুবন্ধে চ সুখং মোহনমাত্মনঃ ।
নিদ্রালস্যপ্রমাদোত্থং তত্তামসমুদাহৃতম্ ॥ ১৮-৩৯॥

ন তদস্তি পৃথিব্যাং বা দিবি দেবেষু বা পুনঃ ।
সত্ত্বং প্রকৃতিজৈর্মুক্তং য়দেভিঃ স্যাত্ত্রিভির্গুণৈঃ ॥ ১৮-৪০॥

ব্রাহ্মণক্ষত্রিয়বিশাং শূদ্রাণাং চ পরন্তপ ।
কর্মাণি প্রবিভক্তানি স্বভাবপ্রভবৈর্গুণৈঃ ॥ ১৮-৪১॥

শমো দমস্তপঃ শৌচং ক্ষান্তিরার্জবমেব চ ।
জ্ঞানং বিজ্ঞানমাস্তিক্যং ব্রহ্মকর্ম স্বভাবজম্ ॥ ১৮-৪২॥

শৌর্যং তেজো ধৃতির্দাক্ষ্যং য়ুদ্ধে চাপ্যপলায়নম্ ।
দানমীশ্বরভাবশ্চ ক্ষাত্রং কর্ম স্বভাবজম্ ॥ ১৮-৪৩॥

কৃষিগৌরক্ষ্যবাণিজ্যং বৈশ্যকর্ম স্বভাবজম্ ।
পরিচর্যাত্মকং কর্ম শূদ্রস্যাপি স্বভাবজম্ ॥ ১৮-৪৪॥

স্বে স্বে কর্মণ্যভিরতঃ সংসিদ্ধিং লভতে নরঃ ।
স্বকর্মনিরতঃ সিদ্ধিং য়থা বিন্দতি তচ্ছৃণু ॥ ১৮-৪৫॥

য়তঃ প্রবৃত্তির্ভূতানাং য়েন সর্বমিদং ততম্ ।
স্বকর্মণা তমভ্যর্চ্য সিদ্ধিং বিন্দতি মানবঃ ॥ ১৮-৪৬॥

BACK TO TOP

শ্রেয়ান্স্বধর্মো বিগুণঃ পরধর্মাত্স্বনুষ্ঠিতাত্ ।
স্বভাবনিয়তং কর্ম কুর্বন্নাপ্নোতি কিল্বিষম্ ॥ ১৮-৪৭॥

সহজং কর্ম কৌন্তেয় সদোষমপি ন ত্যজেত্ ।
সর্বারম্ভা হি দোষেণ ধূমেনাগ্নিরিবাবৃতাঃ ॥ ১৮-৪৮॥

অসক্তবুদ্ধিঃ সর্বত্র জিতাত্মা বিগতস্পৃহঃ ।
নৈষ্কর্ম্যসিদ্ধিং পরমাং সংন্যাসেনাধিগচ্ছতি ॥ ১৮-৪৯॥

সিদ্ধিং প্রাপ্তো য়থা ব্রহ্ম তথাপ্নোতি নিবোধ মে ।
সমাসেনৈব কৌন্তেয় নিষ্ঠা জ্ঞানস্য য়া পরা ॥ ১৮-৫০॥

বুদ্ধ্যা বিশুদ্ধয়া য়ুক্তো ধৃত্যাত্মানং নিয়ম্য চ ।
শব্দাদীন্বিষয়াংস্ত্যক্ত্বা রাগদ্বেষৌ ব্যুদস্য চ ॥ ১৮-৫১॥

বিবিক্তসেবী লঘ্বাশী য়তবাক্কায়মানসঃ ।
ধ্যানয়োগপরো নিত্যং বৈরাগ্যং সমুপাশ্রিতঃ ॥ ১৮-৫২॥

অহঙ্কারং বলং দর্পং কামং ক্রোধং পরিগ্রহম্ ।
বিমুচ্য নির্মমঃ শান্তো ব্রহ্মভূয়ায় কল্পতে ॥ ১৮-৫৩॥

ব্রহ্মভূতঃ প্রসন্নাত্মা ন শোচতি ন কাঙ্ক্ষতি ।
সমঃ সর্বেষু ভূতেষু মদ্ভক্তিং লভতে পরাম্ ॥ ১৮-৫৪॥

ভক্ত্যা মামভিজানাতি য়াবান্যশ্চাস্মি তত্ত্বতঃ ।
ততো মাং তত্ত্বতো জ্ঞাত্বা বিশতে তদনন্তরম্ ॥ ১৮-৫৫॥

সর্বকর্মাণ্যপি সদা কুর্বাণো মদ্ব্যপাশ্রয়ঃ ।
মত্প্রসাদাদবাপ্নোতি শাশ্বতং পদমব্যয়ম্ ॥ ১৮-৫৬॥

চেতসা সর্বকর্মাণি ময়ি সংন্যস্য মত্পরঃ ।
বুদ্ধিয়োগমুপাশ্রিত্য মচ্চিত্তঃ সততং ভব ॥ ১৮-৫৭॥

মচ্চিত্তঃ সর্বদুর্গাণি মত্প্রসাদাত্তরিষ্যসি ।
অথ চেত্ত্বমহঙ্কারান্ন শ্রোষ্যসি বিনঙ্ক্ষ্যসি ॥ ১৮-৫৮॥

য়দহঙ্কারমাশ্রিত্য ন য়োত্স্য ইতি মন্যসে ।
মিথ্যৈষ ব্যবসায়স্তে প্রকৃতিস্ত্বাং নিয়োক্ষ্যতি ॥ ১৮-৫৯॥

স্বভাবজেন কৌন্তেয় নিবদ্ধঃ স্বেন কর্মণা ।
কর্তুং নেচ্ছসি য়ন্মোহাত্করিষ্যস্যবশোঽপি তত্ ॥ ১৮-৬০॥

ঈশ্বরঃ সর্বভূতানাং হৃদ্দেশেঽর্জুন তিষ্ঠতি ।
ভ্রাময়ন্সর্বভূতানি য়ন্ত্রারূঢানি মায়য়া ॥ ১৮-৬১॥

তমেব শরণং গচ্ছ সর্বভাবেন ভারত ।
তত্প্রসাদাত্পরাং শান্তিং স্থানং প্রাপ্স্যসি শাশ্বতম্ ॥ ১৮-৬২॥

BACK TO TOP

ইতি তে জ্ঞানমাখ্যাতং গুহ্যাদ্গুহ্যতরং ময়া ।
বিমৃশ্যৈতদশেষেণ যথেচ্ছসি তথা কুরু ॥ ১৮-৬৩॥

সর্বগুহ্যতমং ভূয়ঃ শৃণু মে পরমং বচঃ ।
ইষ্টোঽসি মে দৃঢমিতি ততো বক্ষ্যামি তে হিতম্ ॥ ১৮-৬৪॥

মন্মনা ভব মদ্ভক্তো মদ্যাজী মাং নমস্কুরু ।
মামেবৈষ্যসি সত্যং তে প্রতিজানে প্রিয়োঽসি মে ॥ ১৮-৬৫॥

সর্বধর্মান্পরিত্যজ্য মামেকং শরণং ব্রজ ।
অহং ত্বা সর্বপাপেভ্যো মোক্ষয়িষ্যামি মা শুচঃ ॥ ১৮-৬৬॥

ইদং তে নাতপস্কায় নাভক্তায় কদাচন ।
ন চাশুশ্রূষবে বাচ্যং ন চ মাং যোঽভ্যসূয়তি ॥ ১৮-৬৭॥

য ইদং পরমং গুহ্যং মদ্ভক্তেষ্বভিধাস্যতি ।
ভক্তিং ময়ি পরাং কৃত্বা মামেবৈষ্যত্যসংশয়ঃ ॥ ১৮-৬৮॥

ন চ তস্মান্মনুষ্যেষু কশ্চিন্মে প্রিয়কৃত্তমঃ ।
ভবিতা ন চ মে তস্মাদন্যঃ প্রিয়তরো ভুবি ॥ ১৮-৬৯॥

অধ্যেষ্যতে চ য ইমং ধর্ম্যং সংবাদমাবয়োঃ ।
জ্ঞানযজ্ঞেন তেনাহমিষ্টঃ স্যামিতি মে মতিঃ ॥ ১৮-৭০॥

শ্রদ্ধাবাননসূয়শ্চ শৃণুয়াদপি যো নরঃ ।
সোঽপি মুক্তঃ শুভাঁল্লোকান্প্রাপ্নুয়াত্পুণ্যকর্মণাম্ ॥ ১৮-৭১॥

কচ্চিদেতচ্ছ্রুতং পার্থ ত্বয়ৈকাগ্রেণ চেতসা ।
কচ্চিদজ্ঞানসম্মোহঃ প্রনষ্টস্তে ধনঞ্জয় ॥ ১৮-৭২॥

অর্জুন উবাচ ।

নষ্টো মোহঃ স্মৃতির্লব্ধা ত্বত্প্রসাদান্ময়াচ্যুত ।
স্থিতোঽস্মি গতসন্দেহঃ করিষ্যে বচনং তব ॥ ১৮-৭৩॥

সঞ্জয় উবাচ ।

ইত্যহং বাসুদেবস্য পার্থস্য চ মহাত্মনঃ ।
সংবাদমিমমশ্রৌষমদ্ভুতং রোমহর্ষণম্ ॥ ১৮-৭৪॥

ব্যাসপ্রসাদাচ্ছ্রুতবানেতদ্গুহ্যমহং পরম্ ।
যোগং যোগেশ্বরাত্কৃষ্ণাত্সাক্ষাত্কথয়তঃ স্বয়ম্ ॥ ১৮-৭৫॥

রাজন্সংস্মৃত্য সংস্মৃত্য সংবাদমিমমদ্ভুতম্ ।
কেশবার্জুনয়োঃ পুণ্যং হৃষ্যামি চ মুহুর্মুহুঃ ॥ ১৮-৭৬॥

BACK TO TOP

তচ্চ সংস্মৃত্য সংস্মৃত্য রূপমত্যদ্ভুতং হরেঃ ।
বিস্ময়ো মে মহান্ রাজন্হৃষ্যামি চ পুনঃ পুনঃ ॥ ১৮-৭৭॥

যত্র য়োগেশ্বরঃ কৃষ্ণো যত্র পার্থো ধনুর্ধরঃ ।
তত্র শ্রীর্বিজয়ো ভূতির্ধ্রুবা নীতির্মতির্মম ॥ ১৮-৭৮॥

ওঁ তত্সদিতি শ্রীমদ্ভগবদ্গীতাসূপনিষত্সু
ব্রহ্মবিদ্যায়াং য়োগশাস্ত্রে শ্রীকৃষ্ণার্জুনসংবাদে
মোক্ষসংন্যাসয়োগো নাম অষ্টাদশোঽধ্যায়ঃ ॥ ১৮॥

ওঁ

শান্তাকারং ভুজগশয়নং পদ্মনাভং সুরেশম্ ।
বিশ্বাধারং গগনসদৃশং মেঘবর্ণং শুভাঙ্গম্ ।
লক্ষ্মীকান্তং কমলনয়নং য়োগিভির্ধ্যানগম্যম্ ।
বন্দে বিষ্ণুং ভবভয়হরং সর্বলোকৈকনাথম্ ॥

% Text title : Shrimad Bhagvadgita
% File name : bhagvadnew.itx
% itxtitle : bhagavadgItA
% engtitle : shrImadbhagavadgItA
% Category : gItA, giitaa, bhagavadgita, vyAsa
% Location : doc_giitaa
% Sublocation : giitaa
% Subcategory : bhagavadgita
% Author : Vyasa
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : NA
% Proofread by : NA, SH, Suryansu Ray, Sowmya Krishnapur
% Description-comments : Mahabharata
% Latest update : November 25, 2017
% Send corrections to : Sanskrit@cheerful.com
% Site access : https://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission. Please help to maintain respect for volunteer spirit.

BACK TO TOP